॥ श्रीसीतारामाभ्यां नमः ॥

जगद्गुरुरामानन्दाचार्यश्रीरामभद्राचार्यविरचित

# भृङ्गदूतम्

*Bhṛṅgadūtam*

(Original *Saṃskṛta*)

*Jagadguru Rāmānandācārya Śvāmī Rāmabhadrācārya*

Typeset using LaTeXby *Nityānanda Miśra*. Send corrections to nmisra@gmail.com.

॥ भृङ्गदूतम् ॥ http://www.jagadgururambhadracharya.com

# अनुक्रमणिका

॥ पूर्वभृङ्गः ॥ ३

॥ उत्तरभृङ्गः ॥ ३७

॥ भृङ्गदूतम् ॥
http://www.jagadgururambhadracharya.com

# अथ भृङ्गदूते पूर्वभृङ्गः

रामो रामारमितचरितोऽप्यार्यमर्यादयाप्तं
पादाेः पद्मे पविमिव वहन् मूर्ध्नि शापं स्वतापम् ।
नीत्वा बाणानलशलभतां वालिनं वानरेशं
कृत्वा मैत्रिं सहरिजिदरिः श्रावणेऽध्यास्त शैलम् ॥ १ ॥

किष्किन्धायास्त्रिपुरपुरभित्पूज्यपादः पुरस्ताद्
गोत्रे गौत्रीगदितसुषमामाधुरीं धीरधुर्यः ।
तिष्ठन् राज्ञा कुणपजनुषां दूरितां दूरितात्मा
स्मारं स्मारं स्मरहरसखोऽप्यास्त सीतास्मरार्तः ॥ २ ॥

यद्यप्यस्य क्षणमपि तयानादिशक्त्या खरारे-
र्वीच्येवापां क्वचिदपि हरेर्नो वियोगस्तथापि ।
लीलारङ्गेऽप्यवनिसुतया वर्जितः पर्वणीव
ग्रस्तज्योत्स्नो नभसि तमसा रामचन्द्रो न रेजे ॥ ३ ॥

मीनो वारः पृथगिव कृतो जिह्मिना जालभाजा
शोकं कोको निशि निगमितः केन कोक्या इवेशः ।
हंसो हंस्या इव मृगयुणा दूरितो दूरकेण
क्ष्माभूतोऽभूदजसुतसुतो व्याकुलोऽव्याकुलोऽपि ॥ ४ ॥

दर्शं दर्शं रसपतिसखान् प्रावृषण्यान् विभावान्
श्रावं श्रावं श्रवणमधुरं बर्हिसारङ्गरावम् ।
स्मारं स्मारं कततगृहिणीस्वर्गवीगव्यदेहां
शं नो लेभे धृतिनिधिरपि क्वापि सीतावियोगी ॥ ५ ॥

प्रत्यूषेसावधिगिरिसरस्यम्बुकम्रे कदाचित्
सन्ध्याव्याजाज्जनकतनयाध्यानमग्नो मनस्वी ।
दूरेसंस्थां व्यथितदयितां जीवयन्दौत्यसोमै-
र्मालामोदा हृतमिव विभुर्भृङ्गमङ्गं ददर्श ॥ ६ ॥

दृष्ट्वा कर्णे कलमिव सुधामञ्जुगुञ्जन्तमिष्टं
वामे वामावनचणमिव स्वं प्रति श्रावयन्तम् ।
भृङ्गं दूतं निजतनुरुचिं प्रेषयिष्यन् प्रियायै
वव्रे वीरो ननु विरहिणीजीवनं प्रेष्ठवार्तम् ॥ ७ ॥

तस्मै कर्णे जपप्रकृतये प्रेमविद्याचणाय
स्निग्धं स्तम्बेरमगुणजुषे जीवितार्थी रमायाः ।
स्रग्वी स्वस्रक्सरसिजरसं स्वर्घ्यमाविश्चकार
प्रीत्या काले किल बहुमता पूज्यपूजा गुणाय ॥ ८ ॥
अन्तर्यामी सकलजगतां धारणो धर्मसेतुः
केतुः कश्चित्कलितधनुषां विश्वविश्रामहेतुः ।
भृङ्गं भृङ्गीश्वरपतिरहो सोऽपि देव्यै दिदेव
प्रह्वः प्रायो दयितविरहः कन्न रङ्कं करोति ॥ ९ ॥
वंशे जातं द्रुहिणजनकोत्सङ्गरङ्गस्य चाले-
र्जाने सस्मात् त्रिगुणितपदैश्चाधिकं तुल्यरूपम् ।
तस्मान्मित्रं जनकतनयादौत्यके त्वां नियुञ्जे
सन्तः प्राहुर्विगतकलुषं भाषणं मित्रपत्न्या ॥ १० ॥
तं त्वां युञ्जे तरणितनयातोयशोभं सलोभं
सन्देशेलाविरुदविशदं मन्मनोमञ्जुदेहम् ।
दूतं पूतं जनककुलजाजीवजीवातुभूतं
प्रेष्ठप्रैषो विरहवनधौ पोतकः प्रोषितायाः ॥ ११ ॥
तत्त्वं गच्छेर्गरुडगमनः पावनीं पामनाशो
लङ्कां लङ्कामरवरपुरीमातुरीर्ष्यत्तुरीयः ।
सीता भीता दिगिभशिरसा यत्र बन्दीकृतैका
काऽपि स्त्रीभिः श्वहृतहरिणीवास्ति शून्ये शुनीभिः ॥ १२ ॥
त्यक्ताहारा स्वशिरसि जटामेकवेणीं दधाना
नेत्रे मीलन्मधुलिडसिताब्जोपमाने समाने ।
मुक्ताभूषा पटरुचिनमद्यक्रवातीयपूषा
सोषःकालाकुलकुमुदिनीवैति दैन्यं प्रिया मे ॥ १३ ॥
रक्षस्त्रीभिर्ननु परिवृता सा शुनीभिर्मृगीव
प्राप्तक्लेशा कुधरजयिना राहुणा रोहिणीव ।
छायेवार्कात्कनकहरिणच्छद्मना दूरिता मत्
प्रस्विन्नाङ्गी न कनकपुरेऽप्येति सौख्यं सखी ते ॥ १४ ॥
सा मद्ध्यानस्तिमितनयना सुप्तवानेव वापी
नश्यत्सोचिः शुचिहृतरसा वीतवीचिर्नदीव ।

क्षीणोत्साहाऽहनि हतहरिर्देहलीदीपिकेवा-
श्वासाधारा यदिह धरते धारणेयीति चित्रम् ॥ १५ ॥
मन्ये मत्वा निजकुलवधूं मास्म वैवस्वतोऽगात्
किं वा सीता तपनतपसा तर्जितो वर्जितात्मा ।
यद्वा साध्वीं स्वसुमणिमहो मत्फणिन्यम्यगौप्सी-
च्छ्रान्तोऽनित्वा वसु निववृते मार्गणात्पाशपाणिः ॥ १६ ॥
रामेत्यर्णद्वयशुभसुधां प्रेम्णि पेपीयमाना
मद्गाथां सा परिभृतगिरा मञ्जुजेगीयमाना ।
मत्पादाब्जे नयनमधुपौ धाम्नि देधीयमाना
जाया जीवेदिदमिह परालम्बनं प्रोषितायाः ॥ १७ ॥
सा मच्चिन्तादिविजपुरि सच्चित्तचिन्तामणिर्वै
मत्तोषाम्भोरसितपदहं पारिजातस्तदीहः ।
तस्या धत्ते सुमतिवरटा मद्यशोमञ्जुमुक्तां
मद्भावारीहृदमरगजा तूर्यमभ्यस्यतीव ॥ १८ ॥
तत्त्वं प्रेयो विरहजलधौ दुस्तरे दूरतीरे
सम्मज्जन्त्या व्यसनपवनोद्विग्ननावः प्रियायाः ।
भूयो भूयाः प्लव इव भवो मन्मनोभृङ्ग देव्याः
प्राहुः प्रैष्ठं विशदमगदं वाचिकं ह्यातुरायै ॥ १९ ॥
यावत्प्राणा न जहति जडा जानकीं जातुजाल्मा-
स्तावद्भ्रातर्भव जनकजाजीवदाने वदान्यः ।
किं वा वारे स्पृहयति तृषा त्यक्तदेहे सुधातः
कादम्बिन्या कथय किमहो प्रावृषा शुष्कशस्ये ॥ २० ॥
सन्देशान् मे मधुप वहतोऽनाहतोर्म्युत्करस्य
प्रेयोवार्तावितरणविधिव्यापृतिव्याप्तकीर्तेः ।
गन्तव्या ते सुकृतमवतो रावणी राजधानी
लङ्काऽलङ्कापुरुषपुरिका काऽपि पारे पयोधेः ॥ २१ ॥
प्रस्थानात्प्राक्कुणपनगरे दुर्गमे देवदैत्यैः
सीताप्रीत्या अवधमिथिलापौष्पपाथेययुक्तः ।
निष्प्रत्यूहं तदनुसुकृती तत्र गन्तुं यतेथाः
श्रेयः सिद्धौ भ्रमणमनघं भूतये भारतस्य ॥ २२ ॥



http://www.jagadgururambhadracharya.com

गङ्गाभङ्गामलकललसत्तुङ्गतारङ्गरङ्गं
कालिन्दीश्रीसरससरयूनर्मदावीचिसङ्गम् ।
गोदाकृष्णाऽमरवरनदीब्रह्मपुत्रप्रसङ्गं
नन्तासि त्वां नमितनयनो भारतं भारतं तत् ॥ २३ ॥
गौरीजन्माम्बुनिधिमथनाऽगस्त्यनम्रोच्चकूटैः
सह्याद्रीन्द्राध्युषितहरिभिश्चित्रकूटाम्रकूटैः ।
नानागोत्रैर्गदितगरिमस्वर्गसोपानभूतं
मन्तासि त्वं मननमधुरं भारतं भारतं तत् ॥ २४ ॥
प्रातः सूर्यः किरणकुसुमैर्यस्य सौभाग्यमर्चन्
गाथागातुं सुवतिसुवयो वन्दिनो वन्द्यवन्द्यम् ।
वर्षाधीशं वसु वसुमतीभागधेयं वसूनां
गन्तासि त्वं गमनकमनं भारतं भारतं तत् ॥ २५ ॥
यस्मिन् सन्तस्तपनतपसासत्तमस्तोममारान्
मर्यादार्या विमदमनसो नाशयन्तो लसन्ति ।
पुण्यारण्यं विबुधवयसां सर्वदैकं शरण्यं
भ्रान्तासि त्वं भ्रमणशमनं भारतं भारतं तत् ॥ २६ ॥
यस्मिन्नित्यं प्रकृतिवनिता बद्धसर्वर्तुसख्या
श्रीमत्सख्या विहरति हरिद्रत्नमत्प्रत्नसख्या ।
रामारामं पिककपिशुकोद्गीतरामाभिरामं
गातासि त्वं श्रुतिकलगिरा भारतं भारतं तत् ॥ २७ ॥
यस्मिन्हिन्दुर्हिमहिमहिमो हीनभावं दुनोति
स्वाहाजुष्टं विकलतनुभृत्सत्यसेवैकयज्ञम् ।
शस्यश्यामं विरतिकलितं त्यागसंस्कारभूमिं
ज्ञातासि त्वं भरतसुहितं भारतं भारतं तत् ॥ २८ ॥
यस्मिन्वेदो विलसति विभुः सर्ववर्णाश्रमाढ्यो
धर्मो धत्ते यदिह भगवान्मामकीनावतारैः ।
यस्मिन्बालाः कलहरिरदा विश्वबन्धुत्वघोषं
स्पृष्टासि त्वं भरतसहितं भारतं भारतं तत् ॥ २९ ॥
यस्मिन्सत्यो दयितनिरता यत्र पत्नीव्रतो ना
यस्मिन्भ्राता तृणयति सुखं शासकः सत्यनिष्ठः ।

त्यागं विश्वे वितरति सदा संस्कृतिर्वै यदीया
द्रष्टासि त्वं भरतमहितं भारतं भारतं तत् ॥ ३० ॥
मत्सन्देशं कुवलयदृशे देष्टुकामोऽभिरामं
गच्छेः पूर्वं पितृसखदिशं भृङ्ग पूर्वामपूर्वाम् ।
प्रत्यूषे यां रविरपि जपापुष्पपूगावदातै-
रर्चत्युस्रैरवनितनयाजन्मदिग्गौरवेण ॥ ३१ ॥
तस्यां द्रष्टास्युपभवभवा मातृकं मातृभूमिं
सीतायास्त्वं मधुप मिथिलां निर्मितां तां मिथेन ।
मध्ये वेदि प्रकटहुतभुग्भुक्तपापत्रितापां
मातापुत्र्योर्ननु मुररिपोरर्चितां वारिपूरैः ॥ ३२ ॥
तत्रारामान्किसलयलसत्सौरभान्सौरभाणा-
मासेवेथा मलयमरुतानीयमानोऽनुशाखम् ।
मत्वा मान्यं स्वसखिदयितप्रेषितं त्वां वदान्यं
सम्मंस्यन्ते मधुकरकलं कोकिलाः काकलीभिः ॥ ३३ ॥
आपृच्छेथाः स्थगितगमनो वस्तुतो भूमिजानिं
सीतातातं जनकनृपतिं कर्णयोर्मञ्जुगुञ्जन् ।
यो मत्प्रेमद्युमणिमनिशं सम्पुटे योगभोगे
गोपं गोपं जयति जयिनो जुष्टगेहो विदेहः ॥ ३४ ॥
मित्रावश्यं रसिकसुखदां व्यस्तकार्यक्रमोऽपि
प्रह्वः प्रेयाः प्रणतशिरसा मैथिलीं वाटिकां ताम् ।
यादात्सीतावदनवनरुड्लोभिने भृङ्गतां ते
पूर्वाऽपूर्वां निजजनिभुवं विस्मरेत् किं कृतघ्नः ॥ ३५ ॥
मध्ये तस्या नववननमन् मानसं मानसाले
पद्मामोदा मुदितमधुपं भाति सीतातडागम् ।
यस्मिन्मज्जन् जनकतनयाभ्यङ्गसङ्गेऽग नूनं
ब्रह्मानन्दामृतशतसरोभ्योऽभ्युपेष्यस्यरागम् ॥ ३६ ॥
तन्मन्मैत्रीमुखसखसरोजन्ममाध्वीमरन्दं
पीत्वा पीत्वात्र महमहितः पान्थपाथेयमीड्यम् ।
कञ्चित् कालं कलय कलया मार्गखेदापनोदं
प्राहुः सख्युः श्वसुरसदनं शर्मणे सज्जनानाम् ॥ ३७ ॥

http://www.jagadgururambhadracharya.com

तत्त्वं गच्छेरलिवर सरो दक्षिणो दक्षिणेन
प्रह्वः प्रायः सकिशललतामण्डपं माधवीयम् ।
विश्वामित्राऽनुचरचणकः सौम्यसौमित्रिसध्र्यङ्
चक्रेऽपूर्वं नयनविषयं मैथिलं यत्र पूर्वम् ॥ ३८ ॥
यस्मिन्सीतानयनसुभगं वन्यधातुप्रसूनै-
र्माम्प्रत्यग्रैर्मगधतनयानन्दनोऽलञ्चकार ।
क्रीडन्केकी मयि घनधिया बद्धरागोऽनुरागी
मद्भूषार्थं नटनमिषतो बर्हमुज्झाम्बभूव ॥ ३९ ॥
तस्मात्प्राच्यां पुरहरवधूलब्धलावण्यलक्ष्मि
द्रक्ष्यस्यारान्मधुप गिरिजामन्दिरं मण्डिताभम् ।
यत्र प्रागादवनितनया मन्मनश्चोरयित्वा
तां वन्देथा वरदवनितां पूज्यपूजाफलाय ॥ ४० ॥
स्नायं स्नायं विमलविमलावीचिविक्लिन्नदेहः
पायं पायं कमनकमलाकामलं कन्दकान्तेः ।
जापं जापं जनकतनयाजीवनं याहि पूर्णः
पुण्यारण्यं सुजनशरणं जानकीजन्मभूमिम् ॥ ४१ ॥
तत्रत्यां त्वं तमिततमसं रेणुकां रैणुकेया-
भीष्टं जुष्टां जलजजनुषा नम्रमूर्ध्ना दधीथाः ।
यस्यां जाग्रज्जनककनकोद्दाममाधुर्यमुक्तां
सीताद्वाराद्यदिव जनको रङ्कतामाप्यमुक्ताम् ॥ ४२ ॥
शृण्वन्गाथां स्थगितगतिकः काञ्चनागीयमानां
सीताजन्मोत्सवशुचिसुधां ब्राह्मणानां मुखेभ्यः ।
सौभाग्याढ्यो निजमुखरुतैर्भृङ्गसारङ्गवाद्यं
प्रस्तूयस्यास्त्वमपि महतां श्रेयसे कापि सेवा ॥ ४३ ॥
तत्रोद्गीतं श्रवणमधुरं व्रीडितोद्गीथगीतं
संशृण्वानो ललितललितं जानकीजन्मगीतम् ।
मैथिल्याढ्यन् नवपदलसन् मैथिलानीवधूभी
रामारामे रमितरमणीरामरामं रमेथाः ॥ ४४ ॥
सीताकुण्डं विमलकमलाम्भोरुहामोदमोदा-
कृष्टस्वर्गोपवनमधुपं गाहतां गाढभक्तिः ।

http://www.jagadgururambhadracharya.com

यच्च क्षेत्रं समनुकृषतो यद्भियं सीरकेतो-
र्भूमिं भित्वा जनकसुतया साधु सौदर्यमापत् ॥ ४५ ॥
तत्त्वं मत्वा मधुकर चिरं रातरामाविहारं
भ्रैङ्गं भैक्षं कुलकमलिनीर्मार्गमाणो मरन्दम् ।
सम्पूज्येथाः श्वसुरनगरे पूपुरन्ध्रीभिरुच्चैः
प्रायः सन्तः श्रितमधुकरी वृत्तयः सत्क्रियन्ते ॥ ४६ ॥
संशृण्वानो ननुनचलसन्मैथिलब्राह्मणानां
ग्रन्थग्रन्थीर्जटिलजटिला गौतमीः कोटिकोटीः ।
गेहे गेहे विवदनपरान्सारिकाभिर्निषिद्धान्
व्रीडामुद्राङ्कनजवदनान्गच्छ पश्यन्वटूंस्त्वम् ॥ ४७ ॥
भुञ्जानस्त्वं कलितकदलीपत्रके सन्धिताढ्यं
साकं शाकैः सदधिपृथुकं तत्कणान् मित्र मूर्ध्ना ।
बिभ्रत्प्रीत्या नय सुनयनानन्दिनीं नन्दयिष्यन्
दूरस्थायाः प्रभवति मुदे मातृभूः बालुकापि ॥ ४८ ॥
बिभ्राणस्त्वं पृथुककणिका लब्धकाणादधर्मा
भूयो भव्यो भविकभविता पण्डितानां प्रतिष्ठः ।
स्वाचार्यत्वं गतमथ गुणैरेत्य वैशेषिकास्त्वां
जिज्ञासेरञ्छ्रितमपि बुधाः षद्पदीं साप्तपद्याम् ॥ ४९ ॥
वृद्धेभ्यस्त्वं मधुप शृणुया दिव्यधानुष्कलीलां
भूयो भौम्या सखिसहितया प्रस्तुतां बालकेलौ ।
यस्यां सीता भटमदहरं घोटकीकृत्य चापं
कर्षं कर्षं भुवि निजपितुर्विस्मयाब्धिं वितेने ॥ ५० ॥
जानामि त्वामवनिसरसीपद्मिनीबद्धनिष्ठं
पद्मामाध्वीव्रतरतिमतां सम्मतं मानसालिम् ।
तस्मात्तन्वन् विरतिविनुतिं मैथिलीचम्पकाभ्यो
भूयो भौमीव्यसनशमने शं चरेश्चञ्चरीक ॥ ५१ ॥
तस्माद्देशाद्धरणितिलकाद्धारणेयीं दिदृक्षुः
प्रत्यङ् प्रत्यक् पुलककलितो याहि यायावरेश ।
वैशाल्याम्भोः पिकरवरसैरर्चितोऽप्याम्रपाल्यां
मा रंसिष्ठा न पथि यतिनो विश्रमो मङ्गलाय ॥ ५२ ॥

http://www.jagadgururambhadracharya.com

तीर्त्वा तूर्णं सुरवरनदीं नम्यनम्यां नदीष्णो
गङ्गां भृङ्ग स्मरहरजटारङ्गखेलत्तरङ्गाम् ।
तत्र स्नात्वा भवभयहरे ब्रह्मवारिण्यपारं
पारावारं सुकृतसुखयोरेत्य मोमुद्यसे त्वम् ॥ ५३ ॥
गङ्गामर्चन् जलजरजसा मान्यतां स्मारयेस्तां
यात्रारम्भे विपिनवसतेर्मानितां भूमिपुत्र्या ।
प्रोष्यक्षेमं सपतिसुहृदा प्रार्चितासे मयेत्थं
श्रेयो दुग्धे तदनुचरणस्मारणं हीश्वराणाम् ॥ ५४ ॥
पारेगङ्गं गमितगरिमा सत्कृपालाभलक्ष्म्या
द्रष्टासि त्वं तनुभृदरणं सूटजं गौतमीयम् ।
यत्राहल्याशिरसिलसता मत्पदेनाभिपेदे
सर्गातीता स्थलकमलिका काप्यभिख्या शिलायाम् ॥ ५५ ॥
यस्मिन् गोत्रोद्गमनप्रकृतिच्छेददक्षं कदक्षं
सूत्रामाणं चपलचपलं योजयञ्जन्मभोग्यैः ।
भोगारम्भं किल विफलयन् गौतमश्चण्डदण्डै-
र्न्यायोपन्ना विशदविरुदं कर्मणैवाभिपेदे ॥ ५६ ॥
यस्मिञ्छामामयुतशरदो यावदात्मानुपापाद्
ग्रावाकारां विपदमनिशं द्वन्द्वसाहं सहन्तीम् ।
पादस्पर्शक्षपितकलुषां सङ्गमय्याशुपत्या
पत्नीं प्रापं पतितजनतापावनत्वं गुणं द्राक् ॥ ५७ ॥
तस्मात्प्रत्यक् प्रथितयशसं सिध्यसिद्धाश्रमं त्वं
विश्वक्सेनाचरिततपसं तापसस्स्वर्गवीकम् ।
यस्मिन्विष्णुस्त्रिभुवनपिताप्यास्त वात्सल्यवार्धौ
मग्नो भग्नाखिलकुलकलाकौशलो देवमातुः ॥ ५८ ॥
क्षीराब्धीनां शतशतशतं रोमराज्यापि बिभ्रत्
धातुर्धाताप्यहह जननीक्षीरपानाभिलाषम् ।
यस्मिंश्चक्रे प्रणतविनतः पञ्चमे स्वावतारे
जातो जातानुरतिमनसां सिद्धिदातापि सिद्धः ॥ ५९ ॥
यस्मिञ्जाग्रत् गुहमुखनिशाः सौम्य सौमित्रिसार्थः
सार्थं कुर्वन्निजजनिगुणं धन्विधूर्यः सधैर्यः ।

http://www.jagadgururambhadracharya.com

वैश्वामित्रं मखमहमवन् सप्तमेऽह्नीषुणास्यं
पारेवार्धिं व्रणमिव भिषङ्नीचमारीचमारात् ॥ ६० ॥
यत्रागृह्णं दिविजसुलभान्यायुधान्यायुधाढ्याद्
यक्षीनाशात्प्रमुदितहृदः कौशिकाच्छक्रदिष्टात् ।
मन्त्रग्रामोपनतविभवान्यौपसंहारवन्ति
प्रातः कर्माण्यरुणकिरणाज्जीवलोको यथार्कात् ॥ ६१ ॥
गच्छेः प्रत्यक् प्रतिभयभयाकारकारूषकारा
कालव्यालीवदनवपुषस्ताटकाया वनं तत् ।
यत्राभूवं सितशरकरो यक्षकन्याकरेणोः
प्रोद्यद्दर्पक्षपणचणकः कोऽपि कण्ठीरवोऽहम् ॥ ६२ ॥
यत्राऽलोक्य द्रुमगिरिकरैश्छन्नमर्कं यथाभ्रैः
सत्सौमित्रिं समरशिखरे शेखरं सुन्दराणाम् ।
मायामय्याः सशरधनुषं ताटकायाः स्थितं मां
विश्वामित्रो मयि गुरुधिया स्वस्तिवाकं बभाषे ॥ ६३ ॥
यत्राकार्षं प्रथमचरितां चारुचारित्ररत्नो-
नूत्नाभ्यासोद्धृतशरशिखिप्लुष्टयक्षेशपुत्रीम् ।
विश्वामित्रव्यसनविशदीभूतभूतेशदेवो
दीव्यन् दिव्यां गतिमथ दिशन् सौम्य संहारलीलाम् ॥ ६४ ॥
तत्र स्थित्वा मलदनिलये कृष्ण कारूषनाम्नि
ग्रामे रामे रमितसुमनाः पाद्मपाथेयपायी ।
श्रोतासि त्वं कृषिकृषिवधूगीतमद्वीर्यगाथे
पाथःक्षेत्रे शिशुरविरुचं शालिशूकं निपश्यन् ॥ ६५ ॥
तस्मात्पश्चाच्छ्रमशिथिलितश्वङ्गिशङ्कः कपर्दि-
क्रीडानृत्यप्रमुदितवृषाकप्युदाराब्जनेत्रात् ।
आविर्भूतां शरसि सरयूं मानसे मन्दमन्दं
गच्छन्द्रक्षस्यमृतपयसा जाह्नवीं मण्डयन्तीम् ॥ ६६ ॥
तत्र स्नात्वा सरससरयूगङ्गयोस्सङ्गमे त्वं
सङ्गं व्यक्त्वा क्षणमथ सखे पद्मिनीरागरङ्गम् ।
मन्दं मन्दं मलयमरुता वीज्यमानो विमानो
मार्गश्रान्तिं किल परिणुदेर्विश्रमो ह्यौषधं नुः ॥ ६७ ॥

http://www.jagadgururambhadracharya.com

विश्रान्तः सन् सपदि जलदश्याम रामाभिरामाः
शृण्वन्गाथाः सुभुजजयिनो मञ्जुजेगीयमानाः ।
ग्रामस्त्रीभिः ससलिलकलत्कञ्जदृग्भिर्भवघ्नी-
र्गत्वा मैत्रावनिपगुरुजां मित्र पश्येः प्रतीच्याम् ॥ ६८ ॥
या तन्वाना विगतरजसः सौम्य साकेतलोके
स्वस्यां स्नाताञ्जयति विरजानामसत्यापयन्ती ।
सैषायोध्याधरणिरमणीमौक्तिकस्रक्स्वरूपा
भूपानूपा सरति सरयूस्तीरयुग्यागयूपा ॥ ६९ ॥
मन्नेत्राम्भोरुहरसरसां साधकस्वर्गवीकां
कन्यां धन्यां रघुकुलगुरोर्मानसीं बाणहेतुम् ।
एणाङ्काभां भवभयहरीं नष्टपङ्काङ्कशङ्कां
वन्देथास्त्वं मम भगिनिकां काञ्चिदिष्टां नदीनाम् ॥ ७० ॥
तस्यास्तीरे तरललिते दक्षिणे दक्षधीरे
ध्यायद्धीरे मलयजमिलन्मञ्जुमाभृत्समीरे ।
कूजत्केकिप्रवरपटलीकोकिलाकोककीरे
द्रक्षस्यास्थामिव तनुभृतां ब्रह्मबोध्यामयोध्याम् ॥ ७१ ॥
त्रेतारम्भेऽभिभरतभुवं साधु साकेतलोकात्
प्रत्युद्गन्तुं प्रथममिव मामागतां सत्यनामाम् ।
पुण्यारामां शरजजननीमासिशुक्ले नवम्या-
मक्षय्याङ्कं सतनुमिव श्रीं कामयोध्यामयोध्याम् ॥ ७२ ॥
यस्यां त्यक्त्वा त्वचमिव तनुं कोऽपि भोगीव भोगी
योगीवान्तःक्षपितकलुषो भग्नभूभूतिभोगः ।
शान्तः शान्ताखिलकुकरणो न्यस्तपञ्चप्रपञ्चः
पूतः पूतप्रथितचरितो मत्सकाशं चकास्ति ॥ ७३ ॥
यस्याः कृत्स्नां कृतिपथिमरीं मृद्यते मञ्जुमृत्स्ना
स्थाणुं विष्णुं विरजयति कं यद्रजोराशिरीड्यः ।
यस्याः पङ्कः कलिजनिभृतां पापपङ्कं प्रमार्ष्टि
त्वं तां सर्गाञ्जलजजनुषो ध्याय मे तामयोध्याम् ॥ ७४ ॥
यस्या धूलौ ध्रुवपदपदो धूसरो बालकेलौ
रिङ्गन्पद्भ्यां न्यपपतमहं लक्षशोऽलब्धलक्षः ।

यन्मृत्स्नायामहह रभसा बालको बद्धतृष्णः
पीयूषं नागणयमधिकं पश्य मे तामयोध्याम् ॥ ७५ ॥
यत्प्राकारा दधति सुषमां न्यक्कृताशेषकाराः
सौधाधाम्ना त्रिदिवसदनान्यासते धर्षयन्तः ।
तां मत्प्राणैरपि बहुमतां राघवीं राजधानीं
वन्देथास्त्वं विनतशिरसा सन्नुतिर्हीष्टसिद्धौ ॥ ७६ ॥
यो वैकुण्ठो गरितगरिमा वेदमूलैः पुराणै-
र्नायोध्यायास्तुलयितुमलं सोऽपि सौभाग्यलक्ष्मीम् ।
किं खद्योतः प्रभवति तुलां चाधिरोढुं कथञ्चिद्
भर्गो भृज्यज्जलदतमसो ग्रीष्ममध्याह्नभानोः ॥ ७७ ॥
नो साकेतः सुखयति हि मां कर्हिचित् दिव्यकेतो
नो गोलोकः कलयति कदाप्यस्तशोकं विशोकम् ।
लब्ध्वायोध्याक्षणवसतिजं सौख्यमानन्दकन्दो-
ऽप्यानन्दानां शतमपि सखे मन्य अस्यंस्तृणाय ॥ ७८ ॥
तत्राभ्येत्य प्रमथपतिना पूजितायां पुरि त्वं
मृत्स्नां कृत्स्नाभयदविरुदोद्भाषितायां षडङ्घ्रे ।
वक्ष्यन्मूर्ध्ना मनसिजमदान्मुग्ध मोमोत्सि मुक्तो
मुक्तात्मेव प्रणतिविशदां प्राप्य मद्भव्यभक्तिम् ॥ ७९ ॥
पश्यन्पश्चात् परिणतवयः कम्पकम्रेद्ध्रशीर्षान्
वृद्धान् विप्रान् विशदवपुषो मद्वियोगाद्विषण्णान् ।
वन्दं वन्दं वद परिणुदन्कौशलं मे महात्मन्
प्रायः शोकापनुदविकला प्रेयसां प्रेष्ठवार्ता ॥ ८० ॥
भूयो भूया भुवनमहितां भूरिभागो गुरोर्मे
दृष्ट्वा भूमौ चितमिव महः पर्णशालां महर्षेः ।
यत्राद्याप्यप्रतिहतरुचश्चारुराराज्यमाना
जाज्वल्यन्ते तमिततमसो मत्स्मृतीनां प्रदीपाः ॥ ८१ ॥
तस्या द्वारे दुरितदलना द्रक्ष्यतेऽरुन्धती ते
तेजोद्धारा ललितललना दीपयन्ती हृदन्तः ।
कम्पं कम्पं दिवसकलना कल्पिता मद्विवासं
ध्वान्तापायं गमयितुमिव प्राप्तरात्री रथाङ्गी ॥ ८२ ॥

विश्वामित्रप्रहुतहुतभुग्भुक्तमुक्तात्मदोष-
श्रद्धाकोशात्मजशतसमुद्दीप्तशोकौर्ववह्निम् ।
शान्ता स्वान्ताम्बुधिवनमहो निर्दहन्तं दुरन्तं
या मत्प्राप्तित्रिदशसरिताशान्तमुच्चैश्चकार ॥ ८३ ॥
यस्या हस्ते प्रथममनलो वह्निहोत्रोपयोगी
योगीवास्माभवदपमले सत्कुले ब्राह्मणानाम् ।
या प्राथम्यात्प्रथितमहिमा सर्वभर्तृव्रतानां
पूजां लेभे श्रुतिरिव गिरां श्रौतसप्तर्षिमध्ये ॥ ८४ ॥
तां वन्देथा जलजजनुषः सुस्नुषां शान्तमूर्तिं
श्रद्धापूर्तिं महितमनसां नित्यमायोध्यकानाम् ।
स्मारं स्मारं मम विवसनं या ससीतानुजस्य
स्तब्धाकारा सवननयना दारुयोषायितास्ते ॥ ८५ ॥
तस्याः पश्येः परमपुरुषाराधिनं दक्षिणेऽर्क-
ज्योतिष्पुञ्जायुतमहमहं ब्रह्मवित्सद्वरिष्ठम् ।
श्वेतश्मश्रुं मम गुरुवरं साग्निहोत्रं यमिष्ठं
वह्न्यागारेऽग्निमिवमवरं त्वं वशिष्ठं वसिष्ठम् ॥ ८६ ॥
वन्देथास्त्वं वरदवनदं ब्राह्मणालीसुशालेः
शान्तं दान्तं दमितदशदिग्दण्डदब्रह्मदण्डम् ।
स्वाहाकारप्रथितयशसा वामया जुष्टवामं
हाहाकारघ्नमनलमिव स्वाहया गार्हपत्यम् ॥ ८७ ॥
गुञ्जं गुञ्जं श्रवणसविधे वेधसस्तस्य सूनो-
र्लूनारण्यारणचणधियोऽनामयं मे वदेथाः ।
मा मायेथा हरणचरितं कोःसुतायाः कजाय
व्रीडाधायी भवति हि गुरोः शिष्यवीर्यापकर्षः ॥ ८८ ॥
यो मां दृष्ट्वा स्वततवचसा यान्तमारादरण्यं
कौसेयस्योपरि परिवृढं धापयन्तं रघूणाम् ।
सीतायास्तं तरुणवयसं चीरमुच्चैर्ननाद
व्याघ्रीक्रान्तो वनगज इव प्रह्वगृह्या हि सन्तः ॥ ८९ ॥
दत्वा सङ्ख्ये निशितविशिखैर्लोकपालेभ्य आशु
प्रोद्यच्छत्रोः समलशिरसां वैश्वदेवं बलिं वै ।

तद्गात्रास्रिग्सरिति सरसं स्नातशीर्षोऽहमुच्चै-
र्वक्ष्ये वृत्तं गुरुवरमहं जैत्रवीर्या हि शिष्याः ॥ ९० ॥
कौसल्यायास्त्वमथ भवनं याहि यायावरेश
प्राच्याः कुह्वा अरविशशिनो मज्जनन्या इवाले ।
या मां सीतानुजसहचरं काननं वीक्ष्य यान्तं
नेत्राम्भोभिः समसिजदलं कुर्वतीवाभिषेकम् ॥ ९१ ॥
स्मारं स्मारं विवसनमथानागसे मे समात्रा
प्रत्तं प्रायो निपतति भुवि प्राप्तमूर्च्छा मुमूर्षुः ।
स्रावं स्रावं स्तनरसमसौ वत्सला गौरिवार्ता
भग्नोपघ्ना व्रततिरिव वै वत्सवित्ता हि माता ॥ ९२ ॥
यस्याः स्तन्यापृषति लषतिः सन्ततं मेऽनभित्सोः
क्षीराब्धीनामहह वहतो लोमभिः कोटिकोटीन् ।
यस्या अङ्कं भुवनजनकोऽप्यारुरुक्षुः सदाहं
को वा मातुर्न भवति ऋणी मातृदेवा हि शिष्टाः ॥ ९३ ॥
यस्या रम्यैः कररुहरवैर्नर्तिताशेषमायो
नृत्यन्नासं पृथुकचरितस्तालिकाताडमुच्चैः ।
यस्या अग्रे न्यपतमबलोऽनेकशो बाललीलौ
यस्या गृह्वन् करजमचलं भूरिदात्री हि धात्री ॥ ९४ ॥
यद्वात्सल्यामृतवननिधौ षड्गुणा मे निमग्ना
ब्रह्मागुण्यः सगुणशिशुतां व्याप्यतां व्यापको गाम् ।
नैरञ्जन्यं जहदकलतां साञ्जनः सत्कलाढ्य-
स्तस्मान्माता छगनमगनेत्याख्यया मां जुहाव ॥ ९५ ॥
यत्क्रोडस्थो निजमुखमहो व्रीडितैणाङ्कबिम्बो
डिम्भोऽयाचेऽसकृदहमहो क्रीडने चन्द्रबिम्बम् ।
या मां धर्तुं चपलमजिरे धावमानं दधावे
ध्याने धातुं क्षणमपि सखे योगिनोऽयं न शेकुः ॥ ९६ ॥
तां वन्देथा विधिहरिहरैर्वन्दितां चन्द्रिताशां
श्रीकौसल्यां मम जननिकां भानुमत्पूतपुत्रीम् ।
लब्ध्वाग्नेयं हविरथ पितुर्या स्वहर्भेऽदधान्मां
तेजो मायावटुमिव सती कश्यपाद्देवमाता ॥ ९७ ॥

http://www.jagadgururambhadracharya.com

तस्या वामे श्रवणपुटके स्वब्दशब्दाभिरामं
गुञ्जं गुञ्जं मधुरमधुरं ब्रूहि मेऽनामयं भोः ।
श्रुत्वा वार्तं सरसिजरसैर्मानितस्तत्र मात्रा
विश्रान्तस्याः पथिकृतिमतेः श्रेयसे विश्रमो हि ॥ ९८ ॥

तत्र भ्राम्यन् भ्रमर मणिभिर्मेदुरं मेऽजिरं त्वं
घ्रायं घ्रायं तरुणतुलसीसौरभं सौम्य पश्येः ।
यस्मिन्क्रीडन् जगदभयदोऽप्यर्भको नैजमूर्ति-
च्छायां दृष्ट्वा स्फटिककचिते प्रारुदं भीतभीतः ॥ ९९ ॥

यत्र स्निग्धैरनुजसखिभिः क्रीडतो मे भुषुण्डी
प्राप्तानन्दो वदनगलितं प्राप्य दध्योदनं तत् ।
यत्कुड्येषु स्फटिकगुणतः बिम्बितं मत्पदाब्जं
भक्त्या भ्राता भरतभरतः साश्रुनेत्रो ववन्दे ॥ १०० ॥

व्यग्रोऽपि त्वं जनकतनयादर्शनार्थं तथापि
द्रागीक्षेथाः स्थगितगमनो मत्पितुः सङ्ग्रहौकः ।
यत्स्थान्यर्भानुचरितसखा मामकक्रीडकानि
प्रायो मातुर्दधति महिकां वत्सलोद्दीपकानाम् ॥ १०१ ॥

तत्राभीष्टां मम घुनघुनां द्रक्ष्यसि त्वं मनोज्ञां
बाल्ये बालप्रकृतिवशतो वादितां तां मयैव ।
या मत्प्राणिप्रसवपुटके लब्धपुण्याधिवासा
श्यामाब्दस्थाम्बुजरविमिलद्विद्युदाभां जहार ॥ १०२ ॥

भूयस्तत्र त्रपुजवनिकाहेममञ्जूषिकास्थां
द्रष्टासि त्वं तव तनुसखीं भ्रामरभ्रामरीं मे ।
या मत्क्रीडापरिकृतचरी पूर्वसंस्कारहेतो-
र्भ्राम्यन्तीवाभिलसति वने वायुनैजल्लतेव ॥ १०३ ॥

तस्यां द्रक्षस्यथ तृणधनुः कामकोदण्डशोभं
बाल्ये यन्मे करतलसखस्तातपादैर्व्यधायि ।
यन्मन्मात्रा नयनसलिलैः प्रत्यहं चाप्रवासात्
पुत्रस्नेहक्षरितपयसा स्नाप्यमानं चकास्ति ॥ १०४ ॥

तस्मात्प्रत्यक् प्रतिमतिहरं हर्म्यमन्मध्यमाम्बं
द्रक्षस्याराद्रतिशतलसद्दीप्तिदासीसहस्रम् ।

http://www.jagadgururambhadracharya.com

यस्मिन्बाल्ये वयसि बहुशः क्रीडनैः क्रीडयन्ती
व्योम्नीवाब्दैर्वनजवदना केकयत्केकयी माम् ॥ १०५ ॥
दासीवाक्याद्विचलितमतिर्मामदोषं विवास्य
प्रायश्चित्तप्रबलदहनोद्दग्धनाथा विनाथा ।
शोचत्यम्बा सुतविरहिता येव गृष्टिर्विवत्सा
साश्रुर्नित्यं व्यसुरिव तनुः को न नष्टः कुसङ्गात् ॥ १०६ ॥
त्रिभ्योऽरण्यं स्वसुवि कुयशोऽराज्यमार्तिं तथात्म-
न्यप्राशस्त्यं विषविधवतां क्रूरमृत्युं स्वभर्त्रे ।
दत्त्वा शोकं दुरितमनिशं तीव्रतापं प्रजायै
भानोर्वंशं व्यहनहह सा भानुसङ्ख्यैः कुठारैः ॥ १०७ ॥
नामं नामं चरणयुगले मध्यमायाश्च मातु-
र्भ्रामं भ्रामं मधुप परितः कर्णयुग्मं तदीयम् ।
ग्लानिग्रस्तामलिवर मुदानामयं मे वदंस्त्वं
शोकं नुद्याः किल मृदुगिरा कैकयी कैः प्रशस्ता ॥ १०८ ॥
तस्माद्दक्षे छतजवसते द्रक्ष्यते दक्षिणाया
आरादार्तिक्षपणमपणप्रेमभाजो जनन्याः ।
मागध्या वै भवनभवनं वैष्णवानामनिन्द्यं
लीलोर्मीभिर्निचितमुचितं सोर्मिलेशस्य यन्मे ॥ १०९ ॥
यत्राशिक्षे दिगधिपबलिं बाल्यकाले सुमित्रा-
मातुर्धातुर्वरबलभृतः पङ्क्तिमूर्ध्नः शिरोभिः ।
रान्त्यारामो मुदितकुमुदो मोदकान्कर्मसक्तः
पापध्वंसं फलमिव लसन्नोचनार्थश्रुतेर्वै ॥ ११० ॥
यद्वेदान्ते प्रथितपरमौदार्यकारुण्यकोशं
कल्याणानामुदधिमनघं भक्तभावैकतोषम् ।
ब्रह्माद्वैतं तमतिसिसुमोद्भासि देहं स्वगेहे
बालं लालालिलितवदनं मामगौप्सीत्सुमित्रा ॥ १११ ॥
तां वन्दित्वा मयि कृअमतिं शक्रशत्रुघ्नसूतिं
वामे कर्णे कथय कुशलं मातरं मे कनिष्ठाम् ।
गुञ्जं गुञ्जं शतशतसुधासौभगं सौभगोत्तिं
त्वामत्यर्थं सरससरयूसारसैरर्चिताम्बा ॥ ११२ ॥

भूयो ब्रूयाः प्रथमगुरवे चापविद्याविधौ मे
मात्रेऽमात्रे हरिरिव हरेर्द्विड्जयं जैत्रवेगः ।
मागध्यै भो भुवनवपुषे वाचिकं वाग्मिवर्य
प्रायो वार्तं प्लव इव विपद्वारिधौ मज्जतो हि ॥ ११३ ॥
लब्ध्वादेशं व्युषितमनघं याश्वपत्यात्मजायाः
कान्तारं मां कटिमुनिपटं नेक्षितुं शक्नुवाना ।
प्रत्यादेशाधिकरणचणाप्यात्मवात्सल्यविन्ध्यं
नीत्वाभ्यर्णं स्वमतिधरणौ कौम्भिवत्प्रत्यशेधीत् ॥ ११४ ॥
तां वन्दित्वा भ्रमर भण भो भार्गवोत्सेकहर्तुः
सत्यां सन्धामिव जलनिधेर्मावहेलां सुवेलाम् ।
लक्ष्मीमिन्दोरिव हिमवतोऽसद्धिमानीं हिमानीं
रामस्यैतां श्रुतिमिव सदा वन्द्यवन्द्यामनिन्द्याम् ॥ ११५ ॥
हत्वा क्रूरान् नृपिशितभुजः संयुगे चण्डबाणै
रक्तैः कोष्णैः कुणपजनुषां योगिनीस्तर्पयित्वा ।
दत्वा पूजां दशमुखशिरःपुष्पिकां दिक्पतिभ्यः
प्रत्यायातस्तवपदरजः शोणपाणिर्ग्रहिष्ये ॥ ११६ ॥
कृत्वासिन्धोर्भरतधरणीं यावदीशं गिरीणा-
मेकां कैकां समधिकनिरातङ्कवादामसादाम् ।
गेहे गेहे दशमुखवधं गाथकान् गापयित्वा
द्रक्ष्यामि त्वां सहजनकजालक्ष्मणश्चाध्ययोध्यम् ॥ ११७ ॥
जानानोऽपि त्वयि मम कृते भूरिवात्सल्यमम्ब
त्वां सन्देक्ष्यन्नहह हृदये हार्दहीनो हृणीये ।
यद्वा नायं प्रकृतिमधुरो राघवस्तेऽपराधी
किं कौटुम्बं क्वचन हि सुखं क्वेव सेवाव्रतानाम् ॥ ११८ ॥
वाच्या वाचामृतरससिचा मागधेयीमुखेन
श्रीसीताया लघुभगिनिका सौम्यसौमित्रपत्नी ।
यावत्प्रत्यागममभिरविं या पदास्पृश्य भूमिं
सारार्तिक्या लिखितवनितेवास्थिता स्फारिताक्षी ॥ ११९ ॥
नो निर्वाति क्षणमपि सखेऽद्यापि नीराजनास्याः
सत्या ब्राह्मी स्थितिरिव सतो लक्ष्मणप्राणिकायाः ।

http://www.jagadgururambhadracharya.com

उर्मीर्लान्ती दयितजलधौ रामभक्तेर्लुनन्ती
कुर्मीः क्रूराः भवभयभृतामूर्मिलेवोर्मिलैव ॥ १२० ॥
आरार्तिक्यं तव विगणयन् हर्तुमार्तिं जनानां
सेवालक्ष्ये धृतशुचिमना लक्ष्मणोऽन्वर्थनामा ।
सम्प्रत्येश्यन् मयि च मनसो लोपयित्वानुबन्धं
सञ्ज्ञासिद्धिं स्वभजनबहुव्रीहिकारं चकार ॥ १२१ ॥
ब्रूयामेकां तव विवशतां भृङ्ग मृद्वब्जकोशे
बद्धो भासि प्रभुरपि महाकाष्ठभेदे निसर्गात् ।
तन्मे भ्राता तव समहरद् वैभवं चोर्मिलायाः
प्रेमाम्भोजं तृणमिव जहत्क्रूरकर्मा हि सेवा ॥ १२२ ॥
निद्रां नारीमशनरसनामाद्विसप्ताब्दमुज्झन्
भुञ्जन् भूयो भरतनिरतप्रेमसन्मार्गगन्त्रीन् ।
सङ्ग्रामाब्धिप्रतरणविधौ मत्कृते बाहुसेतु-
र्हेतुर्जाग्रज्जय सुयशसोऽनामयो लक्ष्मणस्ते ॥ १२३ ॥
भङ्क्त्वा भल्लैर्भरतभयभिद्भूमिभृच्छत्रुजत्रून्
सौभाग्येन्दुं बलजलनिधौ मज्जयित्वाहिजायाः ।
भग्नीकृत्य प्रखरविशिखैरल्पकायोऽतिकायं
भूयाद्भव्यो दृषितृषिलषत्पक्ष्मणो लक्ष्मणस्ते ॥ १२४ ॥
व्यायस्तोऽपि त्वमवनिसुतातोषकर्मण्यलीन्द्र
प्रेक्षोत्कण्ठां कनकभवने मा कृथा भो कृषिष्ठाम् ।
यत्सीतायाः प्रथमवदनप्रेक्षणे प्रीतिदानं
प्रादात्तस्यै विहितदिनकृन्मध्यमं मध्यमाम्बा ॥ १२५ ॥
यस्मिन् सीता शतरतिरुचिर्व्रीडिताशेषशम्पा
पार्श्वस्था मे जलदवपुषः षोडशी षोडशाढ्या ।
वामा रामा रमणरसिका रम्यमाणानुकूलं
श्रीरामाख्या सुखमिव मयान्वर्थितामित्रवर्षम् ॥ १२६ ॥
यत्र श्यामा स्मितशरदिजश्याममञ्जब्जनेत्रा
नेत्रानीता तरुणतरसा प्रोज्ज्वला सोज्ज्वलस्य ।
कान्ता कान्तालककलकला सार्धमध्यर्धरङ्गं
वामावामा क्षणमिव मया रम्यरात्री ररंस्त ॥ १२७ ॥

http://www.jagadgururambhadracharya.com

यस्मिन् स्वःसत्कुसुमलतया क्वापि केलौ कपोले
स्पृष्ट्वा पीशज्ञनकतनया साश्रुकण्ठा क्षतेव ।
कौसल्यायै गदितचरिता रासलीलानभिज्ञा
तर्जं तर्जं मनसि मुमुदे मां समात्रातिमात्रम् ॥ १२८ ॥
यस्मिन् सीता मणिमयमिलन् मञ्जुसुत्रामरत्ने-
ष्वात्मच्छायाः स्फटिकविलसत्कुट्टिमेष्वीक्षमाणा ।
मामाक्षैप्सीत् विपुलललनासंश्रयं सन्दिहाना
न स्वर्गेऽपि त्यजति कलुषं मानिनी स्वं सपत्न्याम् ॥ १२९ ॥
प्रत्यायातः प्रथमदिवसे यत्र सात्मात्रिहुत्या
अक्षैर्लोकं सुखमनुसरन् दिव्यदेवोऽपि दीव्यन् ।
सन्दीव्यन्त्या विहसति तते मातृभिः प्रेक्षमाणे
प्रेक्षागारे मुहुरविजितोऽप्यावनेय्या जितोऽहम् ॥ १३० ॥
यत्र क्रीडारसिकरभसा सौम्य सौमित्रिणाद्धा
चित्रे कृत्वा प्रविकटमुखं मर्कटं दर्श्यमाना ।
सीता भीता हरिमिव मृगी वातधूतेव वल्ली
दृष्ट्वा मात्रा रुदितनयना तर्जयत् देवरं स्वम् ॥ १३१ ॥
यस्मिन्नष्टाभिरथ शुचिभिश्चारुशीलामुखाभिः
सार्धं स्त्रीभिर्जनकसुतयेवात्मशक्त्या नवम्या ।
आसूर्याब्दं कनकभवने रम्यमाणोऽनुकूलं
व्याचक्षेऽहं जगति नवमीजन्महेतुं जनेभ्यः ॥ १३२ ॥
तस्माद्गत्वा कनकसदनात्सत्वरं गत्वरेश
द्रक्षस्यारादजनजनिकां भव्यवायव्यकोणे ।
लोकेशानां मुकुटमणिभिः स्तूयमानेड्यरेणुं
स्वर्धेनुं मच्चरणमनसां रामजन्मस्थलीं मे ॥ १३३ ॥
यां दीव्यन्तो दिविजललनाः शैलकन्याप्रधाना
भक्तिं भावप्रवणहृदया श्रद्दधाना ददानाः ।
नित्यं प्रार्चन्त्यधिविधि परिक्रम्य मूर्ध्ना दधानाः
सौभाग्यास्त्यै यदमलरजो हीड्यपूजा भवाय ॥ १३४ ॥
यद्याः सौधे सुरपतिपुरानित्यमास्पर्धमाने
स्वःसम्भूत्या विबुधविभवैर्भ्राजमाने विमाने ।

http://www.jagadgururambhadracharya.com

श्रीकौसल्याविनतिविवशो व्यापको विश्वरूपो-
ऽप्याविर्भूतोऽहमिह कुरुते किन्न मे भक्तियोगः ॥ १३५ ॥
यां मेषस्थो रविरवनिजो माकरो वै तुलास्थो
भानोःपुत्रः सुरवरगुरुः कर्कगामी च जीवः ।
मैनः शुक्रः सहबुधगणाः स्वोच्चपञ्चग्रहास्ते
मज्जन्मर्क्ष्ये श्रितदशरथाः प्रह्वभावात्प्रणेमुः ॥ १३६ ॥
यां जानाना अमरनिकरा विग्रहं मे तुरीयं
भक्त्युद्रेकाद्विनतवनितावृन्दसीमन्तपुष्पैः ।
संस्कुर्वाणाः सुरभितरसैरार्द्रयन्तोऽर्चयन्ते
प्राहुः पुंसां दुरितदलनं जन्मभूम्यर्चनं मे ॥ १३७ ॥
यस्या धूल्या विलसितजटो धूर्जटिर्धुर्यशौचा-
मङ्गल्यानां शुचिरघतमो रश्मिमाली कपाली ।
आशावासा धनपतिसखोऽप्यास्त दीनोऽपि दानी
किं किं न स्याज्जगति कृतिनां जन्मभुम्यर्चनान्मे ॥ १३८ ॥
ये वै श्रोताः स्मृतिनिगदिता ये च पौराणिका वा
तीर्थास्तर्तुं भवजलनिधिं पोतभूताः प्रभूताः ।
सर्वेऽपीताः ससरसरितः कोसलान्पुण्यकोषा
मत्प्राकट्ये प्रणतशिरसो यां नमस्यां बभूवुः ॥ १३९ ॥
पूयन्तां भो निगमगदिता मूर्तयोऽष्टौ प्रयत्नैः
कामं कामोपहतहृदयैर्नामरूपाक्षराणि ।
किन्त्वर्च्यानां चरति चरमं विग्रहाणां चतुर्णां
नित्यं पूज्यं जगदघहरं जन्मभूमिस्थलं मे ॥ १४० ॥
तस्या यायाः किमपि मधुपाजन्मभूमेश्च पूर्वं
पश्यापूर्वं निमिकुलभवां क्वापि नो दृष्टपूर्वम् ।
पुञ्जीभूतं मह इव सतां विश्ववार्धेस्तमौर्वं
यं सञ्जज्ञेऽश्वपतितनया पर्वतं रत्नपूर्वम् ॥ १४१ ॥
सम्बन्धिन्याः पितरि पतितं सङ्कटं सञ्जिहीर्षुः
श्वश्रूचूडामणिशतरुचीन्कोटिकोटीन् विधित्सुः ।
सीतान्यर्मान् मणिमयगिरिं स्वीयसत्त्वात् क्षणार्धात्
सोढुं नैव प्रभवति पितुर्मानभङ्गं सुपुत्री ॥ १४२ ॥

http://www.jagadgururambhadracharya.com

यस्मिन् भौम्या निशि विरचिते भानुकोटिप्रकाशे
दोषा दोषं सुदिनमिति सा चक्रवाकी विभाव्य ।
साकं भर्त्रा विगतविरहा हृष्टरोमैव रेमे
गुञ्जत्भृङ्गा विकसितदला रम्यराजीवराजिः ॥ १४३ ॥
यस्मिन् मासे नभसि धवले वासरे वै तृतीये
प्रत्येकस्मिन् नभसि वनभृद्वारिदे विद्युदाभे ।
सायम्भूते कलखगकुले चातकैः कीयमाने
आयोज्यन्ते ललितललनालोलदोलोत्सवा नौ ॥ १४४ ॥
तत्र स्थित्वा कतिचन दिनान्यार्य दोलोत्सवेषु
स्मारं स्मारं भव मुखरितः सार्धमीषत्सखीभिः ।
भ्रामं भ्रामं भ्रमर परितः पर्वतं तं मणीनां
विश्रान्तः सन् व्रज कुलवधूभिः स्तुतः कोसलानाम् ॥ १४५ ॥
किञ्चिद्दूरं दुरितदमनं कोणमाग्नेयमेत्य
द्रष्टासि त्वं त्वमिव सुकृतं पार्थिवं पाद्मसर्गात् ।
ग्रामीभूतं भुवनविदितं भक्तिभूमिं विभूम्नो
नन्दिग्रामं भरतनिरतग्रामणीगीतरामम् ॥ १४६ ॥
नन्दिग्रामोऽप्यहह रहितो ग्राम्यगीतैररामो
रामारामोऽप्यथ विरहितो रामरामो विरामः ।
श्यामाश्यामोऽप्यसितसहितः कामकामोऽप्यकामो
धामाधामो भरतमहितो रामरामाभिरामः ॥ १४७ ॥
पश्य भ्रातर्भ्रमर भरतेनानुजेनाभिषिक्ते
मत्पादाङ्के कनककलिते तत्र सिंहासनस्थे ।
न्यासे न्यस्ते किल विवसतः पादुके मे प्रजानां
प्राणांस्त्रातुं विरहयमतो यामिकीकृत्य नूनम् ॥ १४८ ॥
प्रेमप्राज्यं विरहविलसद्दीपकं पर्णशाला-
सुप्रासादं भरतसचिवं पादुकायुग्मभूपम् ।
सेवाधर्माश्रितपुरजनं दैन्यसैन्यं मदीशं
नन्दिग्रामे प्रभवति किमप्यद्भुतं राज्यचक्रम् ॥ १४९ ॥
यत्रासन्द्यां ननु रघुपतेः पादुकारुक्मयुग्मं
यत्रामात्यो भवति भरतः प्रेममूर्तिर्विरागी ।

http://www.jagadgururambhadracharya.com

भक्तिर्भोज्यं मदनुसरणं यस्य जीवातुभूतं
नन्दिग्रामे त्वमनुभविता नूतनं राजतन्त्रम् ॥ १५० ॥
बिभ्रच्चीरं कृशतमतनुं मूर्ध्नि पिङ्गा जटा वै
नेत्रे नीरं मम विरहजं ग्लानितापं च चित्ते ।
बुद्धौ भक्तिं ननु मनसि मां कर्म कायेऽप्यकामं
द्वार्णं वाण्यां तपति भरतो विग्रही वार्यधर्मः ॥ १५१ ॥
जापं जापं स्वमनसि रुदन् राम रामेति जापं
ग्लायं ग्लायं व्यथितहृदयो भावयन् मातृवृत्तम् ।
स्मारं स्मारं भुवि परिलुठन् मां सभार्यं वनस्थं
द्रष्टव्यस्ते मधुप भरतः पादुकाराजमन्त्री ॥ १५२ ॥
क्रन्दिग्रामः किमु न करुणैः क्रन्दितै रामबन्धो-
र्वन्दिग्रामः किमु न चरितैर्माण्डवीजानिगीतैः ।
स्यन्दिग्रामो भरतनयनस्यन्दिभिः किं न नीरै-
र्नन्दिग्रामं प्रति विदधते चित्रमुत्प्रेक्षितानि ॥ १५३ ॥
नान्दिग्रामं भरतविरहं कः क्षमो ना प्रमातुं
यन्नेत्राम्भोलवणितजलं ग्राम्यकौपं चकार ।
यत्कं पीत्वा प्रकृतिरपि मे सत्यसन्धा शशङ्के
नैरामिष्यं व्रतमिव हतं मत्प्रवासे धृतं यत् ॥ १५४ ॥
यस्मिन् क्षीरं निशि शुगनलज्वालपोष्णैः क्वथित्वा
पीत्वा श्वासैः स्वपिति जनता मां ससीतं स्मरन्ती ।
हे रामेति प्रलपनपरैस्ताम्रचूडैः प्रभाते
जागर्यन्ते जडितजनुषो यत्र लोकाः सशोकाः ॥ १५५ ॥
तं त्वं गत्वा भरतनयनप्रस्रवत्बाष्पधारा-
धौताध्वानं मदनुशरणैः पक्षिभिः कीयमानम् ।
नन्दिग्रामं प्रतिकणलसत्प्रेमपूराभिरामं
मन्वानः स्वं सुखमनुभवेः पूर्णकामं प्रकामम् ॥ १५६ ॥
तत्रैकस्मिन्नवनिविवरे छन्नमर्कं यथाभ्रे
विष्टं सृष्टं जलजजनुषा नैव धर्मं सदेहम् ।
मत्प्रेमाणं धृततनुमिवास्मद्दिदृक्षैककामं
पश्यन्नेत्रे भरतभरतं सङ्कृतार्थे कृषीष्ठाः ॥ १५७ ॥

श्यामं श्यामानयनविशिखैरक्षतं क्षीणदोषं
दोषानाथोऽपमितवदनं वारि दृग्वारिजाभ्याम् ।
वर्षन्तं तं सकरुणरसं सन्तमब्दायिताभ्यां
मङ्क्षासि त्वं विरहवनधौ प्रेममूर्तिं विभाव्य ॥ १५८ ॥
मा मा द्राक्षीत् प्रकृतिरनघा प्रातरुत्थाय काचि-
च्चैतच्चेतस्यहह कलयन् यामपूर्वं निशायाः ।
स्नात्वा विघ्नो विशति विवरे साधु सद्यः सरय्वां
प्रायश्चित्तं चरति भरतो हन्त कीदृङ् नवीनम् ॥ १५९ ॥
स्वामी शेते मुनिपटधरः स्थण्डिले सानुजश्री-
स्त्यक्त्वा भोगान् विजनविपिने कन्दमूलाशनो मे ।
इत्यालोच्य प्रदरशयनश्चीरवासाः फलाशी
भ्राता पश्यत्यवधिमनिशं खाड्गधारव्रतीशः ॥ १६० ॥
तत्पार्श्वस्थं सजलनयनं मूकसेवैकसारं
भृङ्ग द्रष्टास्यनघमनुजं लाक्ष्मणं मत्कनिष्ठम् ।
भक्त्या भानुं भरतमिव तं वासरं चानुयान्तं
शत्रुघ्नं भोः कलितभगवत्पारतन्त्रेष्टधर्मम् ॥ १६१ ॥
यो मागध्या दशरथचरोरष्टमांसात्प्रसूतो-
ऽसम्प्रज्ञातः सुकृतसुयतेर्विद्ययेवाद्य योगात् ।
शूरः शूरप्रथितसुयशा गौरवर्णः सुशीलो
वाक्यस्फोटाच्छ्रुतिमुखधिया शाब्दिकस्येव बोधः ॥ १६२ ॥
यद्वाग्देव्यश्वपतितनयां कुर्वती दुष्टबुद्धिं
प्रादान्मह्यं सजनकसुताबन्धवेऽरण्यवासम् ।
शङ्के जानन् मयि विमुखतां शारदाया रिपुघ्नो
नैवासीत्सत्यहह वदनं भारतीं दण्डयिष्यन् ॥ १६३ ॥
सैरध्वज्या मम च भरतस्याङ्घ्रिरेणूँल्ललाटे
नित्यं भक्त्या किल तिलकयन्नूर्ध्वपुण्ड्रं दधानः ।
मज्जन्तीं मद्विरहजलधौ पालयन् सानुबन्धां
कैवर्तोऽभूत् सभरतपुरीं सौम्य शत्रुघ्नलालः ॥ १६४ ॥
वामेऽवामां भरतचरणावार्द्रयन्तीं दृगश्रैः
शोचं शोचं विपिनवसतीं ज्यायसीं राघवाभ्याम् ।

http://www.jagadgururambhadracharya.com

पश्येः प्रेष्ठास्ववननिरतां माण्डवीं मण्डिताभां
राहुग्रस्तं विधुमिव धवं रोहिणीं चानुयाताम् ॥ १६५ ॥
आशासाना मम च भरतोज्जीवनं शोकवह्ने-
राशावर्यामुषसि करुणं कीर्तनं कीर्तयन्ती ।
सीतारामेत्यगदमसुपं माण्डवी पाययन्ती
पान्ती ग्रामं विरहविषतः सोमकादम्बिनीव ॥ १६६ ॥
अन्वायान्तीं भरतदयितां पृष्ठतः प्रेष्ठजीवां
द्रक्ष्यस्याराच्छ्रुतिगुणलसत्कीर्तिमन्वर्थसञ्ज्ञाम् ।
ज्येष्ठाचिन्ताजडितहृदयां श्रावणीं मेघलेखां
सन्निन्दन्तीं निजतनुरुचा सौम्य शत्रुघ्नपत्नीम् ॥ १६७ ॥
छायाभूता द्विषदघमहाध्वान्तहृच्चण्डरश्मेः
शत्रुघ्नस्याप्रतिहतरुचस्तैजसस्येव वश्या ।
स्वप्नावस्था हरति भजतां स्वाप्नमेव प्रपञ्चं
नित्यं स्वप्नान् किल भगवतो या यथार्थीकरोति ॥ १६८ ॥
मित्रैताभिस्तिसृभिरमला मैथिली मत्स्नुषाभि-
र्जाग्रत्स्वप्नप्रगुणशयनाख्याभिरीड्यादशाभिः ।
युक्तेवासौ सनिजविभुभिः शोभते स्माध्ययोध्यं
पूर्णानन्दा मदनुगमना सत्तुरीया तुरीया ॥ १६९ ॥
हन्त स्मृत्वा मधुप मिथिलामण्डपं मङ्गलाढ्यं
चेतश्चिन्ताचलितमिव मे जायतेऽद्यापि विघ्नम् ।
यत्रास्माभिः श्रुतिपरिमितैः रूढदारै रघूणां
राजा रेजे यतिरिव फलैः सत्क्रियैः पूर्णकामः ॥ १७० ॥
नन्दिग्रामे निशि वस सखे क्षिप्रमुत्थाय भूयः
पश्येः प्रातर्भरतविहितं पादुकापूजनं मे ।
बाष्पस्नानं विरहवसनं कन्दमन्त्रं स्मृतीष्ट-
ज्योतिर्दीपं पुलककुसुमं पञ्चपञ्चोपचारम् ॥ १७१ ॥
आनीतं मद्विभवलसितं सादरं चित्रकूटात्
प्रेमोद्रेकात् प्रकटितमदुद्भूतषाड्गुण्यमूर्तिम् ।
भुञ्जन्तं स्वां प्रकृतिमनघं स्वर्णसिंहासनस्थं
नंस्यस्यद्धा कमपि नरपं पादुकायुग्मरूपम् ॥ १७२ ॥

http://www.jagadgururambhadracharya.com

पायं पायं सुमधुररसं सारसानामलीन्द्र
श्रावं श्रावं मम गुणगणं गीतमायोध्यकेभ्यः ।
भावं भावं सरससरयूकुञ्जकेलीः शुभा नौ
शीघ्रं लङ्कां व्रज सुकृतिनो नो प्रमाद्यन्ति कृत्यात् ॥ १७३ ॥
किञ्चिन् मृत्स्नाकणमभिरणंश्चारु गृह्णन्नयोध्या-
पुर्यास्तुर्यां त्वरितगमनो नो प्रमाद्यन्प्रयाहि ।
नूनं देवीं मृदमृतमयीजन्मभूमेर्ममैषा
मृत्योस्त्रातुं प्रभवति चिरं राष्ट्रदेवा महान्तः ॥ १७४ ॥
नन्दिग्रामादव वनरुहप्राप्तपाथेयपूजः
पूज्यैः कूजन् मधुरमधुरं पूजितो दक्षिणेन ।
गत्वा क्रोशं कुशलतमसां वीचिरावच्छलेन
क्रोशन्तीं मामनुभव वनाद्वारिभिर्वारयन्तीम् ॥ १७५ ॥
यस्यास्तीरे प्रथमदिवसे मत्प्रवासस्य मित्र
प्रीत्युद्रेकान्मदनुगमनान्पौरवर्गान् सनिद्रान् ।
नैशीथेऽहं सहजनकजालक्ष्मणो वञ्चयित्वा
योगीवायां विपिनमममो मोहजालं विभज्य ॥ १७६ ॥
यस्याः खेलत्सलिलपुलिने क्रौञ्चयोः क्रीडतोर्वै
ग्राम्यासक्तं हतवति नरं निर्दयेऽस्मिन् निषादे ।
वाल्मीकेः श्रीवदनविगलद्भारती भव्यभावा
धाता दाता त्रिजगति सपद्यादिकाव्योपहारम् ॥ १७७ ॥
तां त्वं भक्त्या भज भगनिकां भावभूमिं कवीनां
भूम्नो भूत्यै तरुणतमसां मध्यचण्डांशुरेखाम् ।
दृष्ट्वा स्पृष्ट्वा मधुप तमसां मोदितासे कृतार्थो
भ्रातुश्श्रेयः किमु न कुरुते मङ्गलाशीः स्वसॄणाम् ॥ १७८ ॥
पेयं पीत्वा तरुणतमसातामरस्यं सुरस्यं
दर्शं दर्शं पथि पथि जनान् मद्वियोगाग्निदग्धान् ।
पश्येर्गोभिस्स्वदितसलिलां गोमतीं गामिवाद्यां
वासिष्ठीं त्वं परमपयसा पावयन्तीमुदीचीम् ॥ १७९ ॥
धायं धायं परिमलमलं गोमतीकर्कटीनां
स्नायं स्नायं शिशिरसलिले धेनुमत्या विमत्तः ।

पश्येः प्रीतस्तदनु शुभगं दक्षिणं तीरमस्याः
यस्मिन् भ्रातर्यहह तिलशो वारिताभूत्स्वसा मे ॥ १८० ॥
भूयो गत्वा मुदितमनसा दक्षिणस्यां सखे त्वं
पश्य प्रीत्या सरितममलां स्यन्दिकां स्यन्दितात्मा ।
या मां दृष्ट्वा सजनकसुतालक्ष्मणं वन्यवेषं
सस्यन्देऽम्भोभरजवमिषात्कारुणिक्यो हि साध्व्यः ॥ १८१ ॥
तत्र स्नात्वा शुचि पिब पयः षद्पद स्यन्दिकाया
विश्रान्तः स्या उटजकुसुमे स्वादृतो धीवरीभ्यः ।
आशृण्वंस्त्वं जगदघहरीर्गीतसीताः सुगाथा
विश्वश्रान्तिं हरति हि नृणामुत्तमश्लोकवादः ॥ १८२ ॥
यैया यास्यन् कलकलशभूवर्त्मना वार्जबन्धो
द्रक्ष्यस्यारादमलकमलं राघवाख्यं सरस्तत् ।
यत्कञ्जानां सुरभिवशगा नान्दनामोदनिन्दं
भृङ्गाभूमिं समभिपतिता गुण्यगृह्या हि सन्तः ॥ १८३ ॥
सीतातर्षं शमयितुमलं यत्पुरारण्यमार्गे
कृत्वा कोटया मम सुधनुषो लक्ष्मणेनानुजेन ।
पारम्पर्यं परमनुसृतं सागराणां सुकृत्या
नूनं वृत्तं न जहति बुधाः पूर्वजानां कदापि ॥ १८४ ॥
अद्याप्येतल्लसति समयास्यन्दिकां स्यन्दमानं
फुल्लम्भोजोन्नटितमधुपं राघवं मे तडागम् ।
धन्वाकारं नरवरनतं नाकिभिर्नम्यमानं
केतीभूतं कथयदिव भो लाघवं लक्ष्मणस्य ॥ १८५ ॥
विज्ञाय त्वामवनिजनुषे सन्दिदिक्षुं सिसृक्षुं
हर्षोत्कर्षं रघुवरपुरीकौशलान्तैरुदन्तैः ।
गुञ्जद्भृङ्गा नवलनलिनी स्वैरनिन्द्यैर्मरन्दै-
रिष्टातिथ्यं किल घटयिता सज्जना नो कृतघ्नाः ॥ १८६ ॥
तत्रस्थस्त्वं विमलसरसो राघवस्यालिवर्यैः
सार्धं मित्रं विहर कतिचिद्वासराण्यात्तसन्धिः ।
विश्रान्तस्सन् व्रज पुनरहो दीर्घमध्वानमाप्तुं
विश्रामो हि प्रथयति गुणानध्वनीनस्य भूत्यै ॥ १८७ ॥

घ्रायं घ्रायं सुरभिमनघं सान्द्रमूर्वारुकानां
पायं पायं रसमधिसुधं साहकारं प्रकामम् ।
श्रावं श्रावं मधुरमवधीगीतकान्याम्रपाल्यां
मा भू रक्तो नहि सुकृतिनः कर्मतः स्वात्प्रमत्ताः ॥ १८८ ॥
पश्यन् स्फीतान् हरितहरितान् कोसलान् शस्यकोषा-
निक्ष्वाकूणां पुरवधिमितः पृष्ठतोभूय भूयः ।
वन्देथास्त्वं प्रणतशिरसा मामकीनामयोध्यां
श्रेयस्यौ हि भ्रमर जननीजन्मभूमी द्युलोकात् ॥ १८९ ॥
भूयः प्राप्स्यस्यनलसगते शृङ्गवेरं पुरं तत्
यज्ञामातुः किल मम पितुर्नामतः ख्यातपूर्वम् ।
यस्मिन् सार्धं निवसति मुनिः शान्तया मद्भगिन्या
सावित्र्येव प्रगुणिततपाः सत्यवान् पूर्णकामः ॥ १९० ॥
शान्तां पश्येर्मम सुभगिनीं मय्यनुक्रोशशीलां
ज्येष्ठां ज्येष्ठारहितमनसं तापसीं विप्रपत्नीम् ।
यां मत्पूर्वं जगदघहृतेऽसूत साध्वी सुमित्रा
प्राचीवाभामुषसि विशदां भृङ्ग भानूदयात्प्राक् ॥ १९१ ॥
तां मद्वाचा प्रणम भगिनीं वन्दितां नश्चतुर्णा-
मेकामेकामिव गुणवतां प्राणवीं छन्दसां वै ।
भर्तुः प्रीतिं समनुदधती साधु सीताननान्दा
ग्रामस्थापि प्रणवति यथा या सुकन्येतिहासम् ॥ १९२ ॥
तातादेशान्निगडिततया श्रैङ्गवेरे पुरेऽपि
द्रष्टुं नायां कमलचरणौ सानुजश्रीर्यदार्ये ।
प्रायश्चित्तं तदहमधुना क्षामये कर्तुकामः
शान्तां शान्तप्रकृतिकलुषां न स्वतन्त्रा हि सेवा ॥ १९३ ॥
प्रत्यायाता कुणपभवनात्सानुगे पङ्क्तिमौलौ
मद्बाणौघैस्तमसि च यथा भानुभिश्चण्डभानोः ।
नष्टे हृष्टे त्रिदशनिकरे शम्भुनेत्रे तथाब्दे
सीता दाता विजयमहितां दक्षिणां स्वां ननान्द्रे ॥ १९४ ॥
गङ्गामङ्ग प्रणम परमोत्तुङ्गरिङ्गत्तरङ्गां
मत्पादाम्भोरुहरसतनुं तान्ततापापसङ्गाम् ।



http://www.jagadgururambhadracharya.com

धात्रे पात्रे विहितवसतिं धूर्जटेर्जूटरङ्गं
मुक्तासङ्गां सलिलवसुधासत्सुधां पापभङ्गाम् ॥ १९५ ॥
त्रातुं जीवान् प्रकृतिकुटिलान् घोरसंसारसिन्धो-
र्या कौटिल्यं श्रयति गमनेऽप्यङ्गगङ्गन्ति गां च ।
डित्सामर्थ्याद्भमभिदधती प्रत्ययं नानुबन्धं
गङ्गेत्याख्यानुगुणचरिता जुष्टपार्षोदरादिः ॥ १९६ ॥
गाहस्वैताममृतसलिलां भव्यभागीरथीं त्वं
पीत्वा पाथः प्रशमितभवं पापसन्तापहारि ।
विश्रान्तस्सन् मिल गुहमले मामकीनं सखायं
यात्रां प्राहुः सुफलनिगमां साधुसत्सङ्गपूर्वाम् ॥ १९७ ॥
यो मां दृष्ट्वा जनकसुतया स्थण्डिले लब्धनिद्रं
शोकोद्रेकात्पुलकिततनुः क्षालयन्नास्यमश्रैः ।
क्रोशं क्रोशं कुररिचरितो मध्यमाम्बां विनिन्दन्
राजद्रोहे व्यवसितमतिर्वारितो लक्ष्मणेन ॥ १९८ ॥
पश्यन्नीहृद्विटपपयसा सन्दधानं जटाके
गङ्गातीरे तरणिमसकृद्दाशकं याचमानम् ।
यः कारुण्याच्छिशुरिव शिरस्ताडमुच्चै रुरोद
प्रायश्चित्तं भवति हि सतां लाक्षिकातुल्यशीलम् ॥ १९९ ॥
दृष्ट्वा यान्तं धरणितनयालक्ष्मणाभ्यां युतं मां
घोरारण्यं मुनिपटधरं मद्वियोगासहिष्णोः ।
दृग्भ्यां यस्यानिशमभिपतद्रक्तमव्याप्तियुक्त-
मक्ष्णोश्चक्रे मम च सुहृदो लक्षणं बाष्पवत्वम् ॥ २०० ॥
तन्मन्मित्रं गुहमभिवदानामयं मामकीनं
किञ्चित्कालं निवस रमयन् रामवार्ताभिधानैः ।
नूनं नृणां व्यसनवनधौ मज्जतामातुराणां
पोतायन्ते मम शुचिकथाः साधुभिर्गीयमानाः ॥ २०१ ॥
ग्रामो रामो गत इत अतो ग्रामनामा सुधामा
ग्रामो रामप्रतिमवपुषा श्यामशस्येन ग्रामः ।
ग्रामो रामामितगुणगणो गीयतेऽस्मिंस्ततोऽयं
ग्रामो रामो रम इह मतो विग्रहैर्वेदसञ्ज्ञैः ॥ २०२ ॥



http://www.jagadgururambhadracharya.com

निर्दोषाणां विगतभृकुटीविभ्रमप्रेक्षणीनां
कन्थाभ्राजं कुमुददयितस्मेरमञ्जाननानाम् ।
कैवर्तीनां श्रवणसुखदं गीतसीताभिरामं
शृण्वन् रात्रौ वनजवसते रंस्यसे रामकीर्तौ ॥ २०३ ॥
अन्वागच्छन् गुहमलिपते शिंशुपाभिः परीतं
द्रष्टासि त्वं त्वमिव वसुधासर्गतो मत्पदाङ्कम् ।
नैषादीनां नयनसलिलैर्मार्जमानं ह्यजस्रं
त्रातं यत्नात्तरणिपभृता चत्वरं रामपूर्वम् ॥ २०४ ॥
तस्मिन्नित्यं गुहपरिकरैस्त्रायमाणं यथा स्वं
लब्धालभ्यं भजनरसिकैः पञ्चमं वा पुमर्थम् ।
शालग्रामं कनकखचिते सम्पुटे खे यथार्कं
कावास्तीर्णं च्युतमिव दिवो विष्टरं दार्भिकं नौ ॥ २०५ ॥
सीताशाटीकनकविगलद्बिन्दुभिर्भूष्यमाणं
द्रक्षस्यद्याप्यहह सुहृदा प्राणवत्त्रायमाणम् ।
स्वर्गारामप्रसवकुसुमैर्नित्यमाकीर्यमाणं
पुञ्जीभूतं शुभमिव नृणां पुम्भिरास्मर्यमाणम् ॥ २०६ ॥
तस्माद्गत्वा पवनगतिमन् दक्षिणेनाध्वना त्वं
द्रक्षस्याराद्भवभयहरं तीर्थराजं प्रयागम् ।
मध्ये गङ्गातपनसुतयोः पश्य गां तोयभूतां
ब्राह्मीं विद्यामिव धृततनुं मञ्जुमीमांसयोर्वै ॥ २०७ ॥
प्रेम्णा पश्याक्षयवटमले मामिवाक्षैय्यदेहं
सर्गध्वंसेऽप्युदधिसलिले यो न मग्नो बभूव ।
पर्णे यस्य स्वविभवविभा व्रीडितोद्यत्सुपर्णे
सृष्टेरादौ धृतशिशुतनुः सानुरागः शये स्म ॥ २०८ ॥
यस्यच्छायां मरकतमयीं सेवमाना मुनीन्द्राः
संसारार्कज्वलनभयतो न व्यथन्ते कदाचित् ।
क्षत्रीभूय प्रतिपदमहो तीर्थकानां प्रयागं
राजानं यः कलयति चिरं छत्रलक्ष्मा हि भूपः ॥ २०९ ॥
यस्मिन् यागैः श्रुतिनिगदितैः स्मर्यमाणैरसङ्ख्यै-
र्यज्ञं यष्टुं परिणतधियो देववर्या यतन्ते ।

http://www.jagadgururambhadracharya.com

तस्मात्ख्यातो दिवि भुवि सखे तीर्थराजः प्रयागो
यत्र त्यक्त्वा तनुमममधीर्नाश्नुते देहबन्धम् ॥ २१० ॥
स्पृष्ट्वा मङ्क्त्वा मुदितमनसा पूतदेहस्त्रिवेण्यां
पश्य प्रीतः प्रियवरभरद्वाजमात्मस्थचित्तम् ।
सप्तर्षीणां लसति गगने यस्तृतीयास्पदं वै
बिभ्रद्धीर्यात्स्वरिव निगमे व्याहृतीनां तृतीयाम् ॥ २११ ॥
तस्मादित्वा प्रथिततपसश्चाश्रमात्त्वं महर्षेः
पश्यावाच्यां यमन यमुनां मच्छरीराभनीरम् ।
धारासारैरमिहिरसुतां गन्तुकामां त्रियामां
स्वात्मद्योतैरिव हरिदिशि ब्रह्मवेलां सुवेलाम् ॥ २१२ ॥
नावा तीर्त्वा तरणितनयां ज्ञानवान् गां गवेव
प्रह्वः पूज्यां दिनकरसुतां प्रस्थितश्चित्रकूटम् ।
प्रायः पुंसां दुरितदलनं प्राहुरीड्यव्रतानां
श्रद्धेयानामपचितिविधिं श्रद्धया सृज्यमानम् ॥ २१३ ॥
तां वन्दित्वा वनजकुलपो जातिकां जातहर्षः
श्रीकालिन्दीं मम कुलभवां भावयन् भावितात्मा ।
लब्ध्वानुज्ञां व्रज मधुपराड् दक्षिणं दक्षिणास्यो
नानाशीर्भिः कलयितुमलं चित्रकूटं त्रिकूटात् ॥ २१४ ॥
गुञ्जं गुञ्जं पथि पथि पिबन् पुण्यपाथोजपेयं
मेलं मेलं निजमुखरितं झिल्लिकानां विरावैः ।
क्रामं क्रामं क्रमुकवपुषा वृक्षशैलापगास्त्वं
मोघीकुर्वन् कलुषमचिराल्लप्स्यसे चित्रकूटम् ॥ २१५ ॥
त्वामायान्तं विपिनवनिता वीक्ष्य विश्वाभिरामं
रामारामं रमितरसिकं रस्यगृह्यं गृहार्हम् ।
प्रेमोद्रेकप्रसरपुलका नेत्रपद्मासवार्घ्ये-
रञ्चिष्यन्ति प्रमुदितहृदः स्वागतज्ञा हि सन्तः ॥ २१६ ॥
मार्गे पश्यन् वनविटपिनः सौरभाकृष्टदेवा-
रण्यालीन्द्रान्पथिक जनताचित्तपद्मैकसद्मान् ।
प्रेम्णा पीत्वा मधुप मधुरां मञ्जुमाधूपमाध्वीं
योगीवैष्यस्यनुपमगतिं सुस्थलीं चित्रकूटीम् ॥ २१७ ॥

http://www.jagadgururambhadracharya.com

सिंहव्याघ्रैः करटिभिरलं सेवितं सेवितार्यं
नित्यं जुष्टं मुनिभिरनघैः सानुरागैर्विरागैः ।
सिक्तं तोयैस्तुहिनशिशिरैर्निर्झराणामजस्रं
नेवैताखं सुखमुपगतश्चित्रकूटं त्रिकूटात् ॥ २१८ ॥
वाल्मीकेस्त्वं प्रविश मधुप स्वाश्रमं शान्तवैरं
पूर्वं पूर्वानुचरितचरं चित्रकूटप्रवेशात् ।
सौमङ्गल्यं भवति हि सतां दर्शनं पुण्यभाजां
श्रेयस्सिद्धौ प्रयतमनसां सत्यशीलव्रतानाम् ॥ २१९ ॥
वाल्मीकिं त्वं प्रणम मधुरं वार्तमावर्तयन्मे
तत्पादाम्भोरुहरसमहो भृङ्ग पीत्वानवद्यम् ।
तस्यानुज्ञां शिरसि निदधत् धामधुर्यं सतुर्यं
सच्चातुर्यं त्वरितगतिमान् गच्छ चिच्चित्रकूटम् ॥ २२० ॥
धातुस्सर्गं समतिशयितो भग्नभक्तत्रिकूटः
स्निग्धस्नेहामृतकणरसप्लावितस्वर्णकूटः ।
मत्पादाङ्कोच्छलितमहिमोद्दाम माणिक्यकूटो
द्रष्टव्यस्ते सुभगसुभगश्चिन्मयश्चित्रकूटः ॥ २२१ ॥
मन्दाकिन्या विमलपयसा पाविताशेषकूटे
नित्यं क्रन्दद्भरतनयनोद्बाष्पसङ्क्लिन्नकूटे ।
शृङ्गोत्सेधप्रमथितपयस्सिन्धुमन्थाद्रिकूटे
रन्तव्यं तेऽप्यवहितगतेश्चित्रकूटेऽत्रिकूटे ॥ २२२ ॥
यस्मिन् सीता विहरति सुखं मञ्जुजां भोजहारा
शोभाव्रीडद्रतिशतरुचिश्चारुचन्द्रांशुहासा ।
शष्पश्यामो मुनिजननुतो नम्रशाखोऽनुशाखो
विस्मर्तव्यो न खलु भवता चिद्घनश्चित्रकूटः ॥ २२३ ॥
यस्मिन् नित्यं मुनिनृपतयो योगिवर्या यतीन्द्रा-
स्तप्यन्ते वै परमथ तपः साधवः श्वासरोधम् ।
उत्तिष्ठन्तो वनविटपिनो वर्षवातातपानि
क्षामं क्षामं क्षपयितुमलं विश्वरोगान् यतन्ते ॥ २२४ ॥
यस्मिन्नॄणां कलुषशमनायात्रिभार्यानसूया
स्वर्गाद्गङ्गां मदगदपदाम्भोजभूतां प्रवर्त्य ।

http://www.jagadgururambhadracharya.com

अन्वायान्ती विशदतपसा वर्त्मभागीरथं वै
व्यर्थं चक्रे प्रथितमबला नाम नारीजनस्य ॥ २२५ ॥
क्राम्यन् क्राम्यन् गिरिवनभयं पान्थपन्थानमध्व-
न्यत्युत्साहाद्द्विगणिततृषाक्षुत्प्रकोपः प्रकामम् ।
मन्दाकिन्यां श्रमविहतये स्नाहि शीतोदकायां
यात्राक्लान्तिं हरति हि नृणां स्वच्छपाथोऽवगाहः ॥ २२६ ॥
तत्रोदीच्यां दिशि पुनरले पृष्ठतोभूय पश्ये-
र्धन्वाकारं नदमथ नदीं सर्वतो ब्राह्मकुण्डीम् ।
चापीभूतं लसति यदहो चित्रकूटस्य साक्षात्
सैनापत्यं समधिभजतः पापशूरैर्युयुत्सोः ॥ २२७ ॥
तत्रेक्षेथास्त्रिदशतिलकैः कोलकैरातवेशैः
क्लृप्तां पर्णैस्तृणदलसुमैर्मामिकां पर्णशालाम् ।
यस्यां सीतामुखविधुविशच्चारुचक्षुश्चकोरो
नामन्येऽहं सुरपतिपुरीं लब्धहर्षस्तृणाय ॥ २२८ ॥
गाहेथास्त्वं मधुकर पयस्विन्यमोघार्थनाम्नीं
नित्यं द्व्यर्थोल्लसितपयसं सन्नदीशां नदीष्णः ।
वर्षे वर्षे मयि शिशुतनौ वत्सलद्व्याद्यया भोः
मात्रेवाद्याप्यहह विशदा स्नूयते दुग्धधारा ॥ २२९ ॥
प्रीत्या पश्येरथ वरतटे पर्णशालाद्वयं मे
कोलाकारै रचितममरैरुत्तरे दुग्धधुन्याः ।
यस्मिन् सीतामगधतनयासूनुसध्र्यङ् सलासो
लब्धावासः शतशतमहं शक्रनाम्नां विजिग्ये ॥ २३० ॥
पश्य भ्राम्यन् भ्रमर भगवद्भ्रामरीं भ्राममुच्चैः
शालामेकां सुललितलघुं ब्रह्मविद्यामिवाद्याम् ।
यस्यामावां सृतचिदचितौ कार्यहेतू विशिष्टा-
द्वैतात्मानो ससुखमुषितौ दम्पती ब्रह्मभूतौ ॥ २३१ ॥
तत्रैवान्यां सकिसलतृणां पर्णशालां विशालां
पश्यत्त्रय्याः प्रतिकृतिमिव प्रत्तदीर्घावकाशम् ।
यस्यां सीतास्वनुजसहितं मां मुनीन्द्रा इवेन्द्रं
स्वाशीस्तोयैः ससुतदयितं नित्यमेवाभ्यसिञ्चन् ॥ २३२ ॥

तस्या आराद्बहिरथ सखे दृश्यतां यज्ञवेदी
भौमीभास्वद्भिभवरचिता प्रोज्ज्वलज्ज्ञातवेदाः ।
यस्यां सीरध्वजकुलजया वामभागस्थयाहं
नित्यं प्रातर्विधिवदनघं वह्निहोत्रं स्म जुह्वे ॥ २३३ ॥
भूयस्तत्राघटितघटने रम्यतां रामघट्टे
मन्दाकिन्या कटक इव यो नित्यमाभाति भासा ।
यत्रासीनान्मधुप तुलसीदासतोऽहं ग्रहीता-
स्म्याविर्भूयावनिपतिशिशुश्चन्दनं प्रेमगृह्यः ॥ २३४ ॥
तस्मिन् क्लान्तः कुधरगहने वर्त्मनि त्वं षडङ्घ्रे
गच्छन्पूर्वं त्वरितगतिको रामघट्टादपूर्वम् ।
पीयस्वापः शिशिरसुधिताः पार्वतेऽपां प्रपाते
सद्घातित्वात्सपदि हनुमद्धारया ख्यास्यते यः ॥ २३५ ॥
तस्मात् प्रत्यङ् सुभग तुलसीपीठमेवेहि धीमन्
मन्दं मन्दं मलयमरुता मामदो माद्यमानः ।
मन्दाकिन्या विमलपुलिने लब्धनित्यप्रतिष्ठं
आस्माकीनाप्रतिमप्रतिमामाधुरीधुर्यनिष्ठम् ॥ २३६ ॥
यस्मिन् सीता विविधतुलसीवृक्षकांश्चित्रकूटे
संरोप्यार्द्रत् सुरसरिदृणैर्हार्दकुम्भाधिवासैः ।
प्रीत्या पुष्णात्स्वतनयसमान् दिव्यवात्सल्यवर्षा
तेन ख्यातस्त्रिभुवि तुलसीपीठनाम्नायमद्रिः ॥ २३७ ॥
पित्रादेशं वहति शिरसा लक्ष्मणश्रीसमेते
मय्यायाते मुनिपटधरे काननं चैत्रकूटम् ।
अत्रैवाभून्मदवनिसुतामातृसंवित्प्रकर्षो
यन्नाद्यापि त्यजति करुणां हृद्विहीनो न लोकः ॥ २३८ ॥
दोषाद्यापि प्रशमितरवे श्रूयते श्रीसुमित्रा-
सूनोश्चापध्वनिरविरतो व्योमगङ्गातटेषु ।
हिक्काशब्दो भरतवदनान्निःसृतोऽद्यापि नृणां
शान्तस्वान्तं त्वमिव तरुजं यत्सपत्राकरोति ॥ २३९ ॥
शोषं नेतान्यहह भरतव्याकुलाक्ष्युद्भवानि
क्रन्दोद्वेगाद्द्रुतगतितया निर्झराण्यद्रिमौलौ ।

http://www.jagadgururambhadracharya.com

स्मारं स्मारं मदनुजशुगुद्भूतवैक्लव्यभावं
रन्ध्रव्याजाद्दलितहृदया क्रन्दति क्ष्मेव साक्षात् ॥ २४० ॥
तत्रावाच्यां दिशि विलसितां जानकीपादपद्म-
स्वङ्कस्वाङ्कामवनिमवनिं पद्मरागावलीनाम् ।
पश्यन् प्रीतः किल शुचिसुताकौतुकाढ्यां महीं तां
मा भूर्भ्रान्तः स्थलकमलिनी प्रत्यले पाद्मपेयः ॥ २४१ ॥
भ्राम्यन् भूयो भ्रमर पवितो जानकीकुण्डनाम्नीं
मन्दाकिन्या विमलसलिलैः क्षालितां सुस्थलीं ताम् ।
पश्यन्नानात्वमिव जननीक्रोडकेलिं प्रियाया
मा शङ्किष्ठा हरणविषये नो मृदुस्तर्कचुञ्चुः ॥ २४२ ॥
पश्यन् प्रेम्णोदधिरिपुपथे नोत्पतन्पद्मसद्मन्
मध्ये क्लृप्तां स्फटिकशिलया मद्विहारैकभूमिम् ।
यत्राकार्षञ्च नवनवतिं रासमुद्यद्विलासं
सार्धं सार्धं जनकसुतयैवैकपत्नीव्रतोऽहम् ॥ २४३ ॥
यत्र स्थित्वा स्फटिकशिलया सुप्रतिच्छायितायाः
स्वस्या दृष्ट्वा प्रतिकृतिशतं जातसापत्न्यशङ्का ।
सासूयं मामहनवनिजा वामचक्षुश्शरोघैः
प्राप्याश्वस्तोटजमगदराट् प्रत्ययो मानिनीनाम् ॥ २४४ ॥
यत्रासीनो रसिकरमणश्चारुशृङ्गारचुञ्चु-
र्नानापुष्पैर्निजकरचितैर्भूषयन् भूमिपुत्रीम् ।
ऐन्द्रं सीताचरणदरणं दण्डयन् ब्रह्मशीर्ष्णा
लोके नारीजनविगणनापापपाकं समाख्यम् ॥ २४५ ॥
गत्वा गत्या विजितमरुता पर्वतः कामदोऽसौ
नत्वा मूर्ध्ना मधुकर परिक्रम्यतामर्थसिद्धौ ।
कामानिष्टान् किल निजरजस्सेवकेभ्यो ददानो
जैत्रो जाग्रन् मणिरिव गिरिर्भारते भाति दैवः ॥ २४६ ॥
कं ब्रह्माणं मधुमथनमं मं महेशं नियच्छन्
यच्छन् नृभ्यो मदमलपदाम्भोजसेवैककामम् ।
द्यन्वै कामं शुभगुणहरं शात्रवं सज्जनानां
भूतार्थे नोल्लसति ललितः कामदः कामदेन ॥ २४७ ॥

http://www.jagadguruambhadracharya.com

शैलाधीशं धृतमतिपरिक्रामतो दक्षहस्ते
स्थानं द्रक्षस्यघघनरविं पर्वतोपत्यकायाम् ।
यत्राश्लिष्टः स्वपुरिभरतश्चित्रकूटाद्वियासु
र्मामप्यश्रैः सगिरिरुदितैर्द्रावयामास भूमिम् ॥ २४८ ॥
किञ्चिद्दूरं दुरितशमनं लाक्ष्मणं पर्वतं त्वं
गत्वा पश्य प्रकटितमले पुण्यपुगं च पुंसाम् ।
यस्मिंस्तिस्ठन्मणिमिव फणी बद्धवीरासनो मां
बन्धुर्बन्धुं निशिधृतधनुस्त्रायते स्मापनिद्रः ॥ २४९ ॥
मुख्यद्वारं तदनुभवता छन्दतश्छन्दगामिन्
गत्वा पूर्वं गिरिवरमणिः पूज्यतामिष्टसिद्धौ ।
शालग्रामान् त्वमधिवदनं कामदस्यार्च पञ्च
श्रेयःसूते ध्रुवमथ कृता श्रद्धया पूज्यपूजा ॥ २५० ॥
भ्राम्यन् भ्रातः सरससरयूधारया सिच्यमानो
दृष्ट्वा शम्भुं गजमदहरं गुप्तगोदावरीं च ।
वाञ्छन् द्रष्टुं जनकतनयां चानसूयोऽनसूयां
नत्वागस्त्याचरितहरितापूर्वभृङ्गं प्रयाहि ॥ २५१ ॥

॥ श्रीराघवः शन्तनोतु ॥

http://www.jagadgururambhadracharya.com

# अथ भृङ्गदूते उत्तरभृङ्गः

सीताशोकत्रिशिखजलदं वेगसंविघ्नवातं
रातं रात्रा निखिलजगतां शान्तये संवृणेऽहम् ।
रामो रामामवितुमरितो जीवजीवातुवाक्यैः
सन्देशार्थैः पुनरपि मनोभृङ्ग दूतोत्तरे त्वाम् ॥ १ ॥
जानानस्त्वां परिचितचरं भूमिकन्यामुखाब्ज-
स्वामोदेन प्रगुणमधुना सीधुना षड्वदेशम् ।
दातुं लाभं पुनरपि च तं प्रेषये तात तस्यै
निर्विण्णः को भवति रसिकः सोमतः पीतपूर्वात् ॥ २ ॥
आमन्त्र्यात्रिं त्रिसुरजनकं प्रस्थितश्चित्रकूटा-
न्मा भूर्विघ्नः पथि पथिकराट् संस्मरन् पूर्वसङ्गान् ।
सेवाकर्मण्यनिशमनघाः स्वामिभिस्सन्नियुक्ताः
सन्दृश्यन्ते नहि सुकृतिनः कृत्यतः स्वात्प्रमत्ताः ॥ ३ ॥
दृष्ट्वा गर्तं भवनिधिमिव ध्वान्तसद्मात्यगाधं
घोराकारं पथिक विजने मा गमो भीतिमुच्चैः ।
सोऽयं सीताव्यसनकरणं क्षेप्तुमार्तं विराधं
मद्बाणौघैर्वृणितवपुषं लक्ष्मणेन व्यखानि ॥ ४ ॥
यो वै गर्तं खनति कुटिलः कोऽपि पापी परार्थं
तस्मै धात्रावटमतिभयं खन्यते पूर्वमेव ।
तत्सिद्धान्तादखिलजगदावटयनिर्माणकारी
स्वभ्रे हत्वा विशिखनिकरैः पातितो मे विराधः ॥ ५ ॥
तस्माद्गच्छञ्छमनहरिता स्वाश्रमं शारभङ्गं
द्रष्टासि त्वं धृततनुतपस्तापसानां क्षितीन्द्रम् ।
भङ्गोऽत्राभून् मधुपतिसखप्रेषितानां शराणां
तेन ख्यातो मुनिरथ शरप्रोक्तिपूर्वो हि भङ्गः ॥ ६ ॥
जित्वा पुण्यैर्जटिलतपसैवोर्जितं ब्रह्मलोकं
यान्यानेन प्रथितमुखतो रम्यरामायणे यः ।
श्रुत्वा यान्तं वनमभि च मां भूमिमेवापपात
स्वर्गं त्यक्त्वा सगुणरसिकः श्रेयसे मत्प्रतीक्षा ॥ ७ ॥

http://www.jagadgururambhadracharya.com

तत्र स्नायास्त्वमपि तृणकैराविले शारभङ्गे
मायावादैरिव सबलिते नित्यकल्याणधाम्नि ।
ब्रह्मण्यन्तःस्फुरति सुगुणे निर्मले निर्विकारे
गङ्गामुख्या यदथ सरितः शुद्धभक्त्या नमन्ति ॥ ८ ॥
तस्मादित्वा कलशजपथेनास्थिकूटं मुनीनां
श्रद्धापूर्वं सरसिजरसैस्तर्पयेथाः षडङ्गे ।
यद्दृष्ट्वाहं प्रशमजलधिः प्रोच्छलद्रुद्रवरङ्गः
कर्तुं भूमिं क्षपितकुणपां प्रत्त जाने जनौघे ॥ ९ ॥
क्रन्दन्तीनां निशिचरकरैर्भक्षितप्राणपानां
लुण्ठन्तीनां व्रजभुवि सखे ब्राह्मणीनां समक्षम् ।
त्वं वन्दित्वा श्रवणपुटयोर्वाचिकं वाचयेर्मे
स्वाश्वासोऽपि प्रभवति नृणां प्राणरोधाय कामम् ॥ १० ॥
बाणार्कौस्त्रैर्निशिचरतमस्तोममाजौ निरस्यन्
व्यस्यन्व्याप्तप्रतिभयभवाभावभावाप्तदोषान् ।
रामो दोषाचरपतिशिरश्श्रेणिभिर्भूतनाथ-
स्रग्व्यापार प्रथितकलया निर्वृतो वन्दितावः ॥ ११ ॥
द्रष्टासि द्राङ्मुनिकुलपतिं ब्रह्मचर्यैकनिष्ठं
तेजीयांसं तपनतपसा तीक्ष्णतीक्ष्णं सुतीक्ष्णम् ।
यत्संश्लेषात्पुलकिततनुः प्रेमपाथोधिमग्न-
स्तापिच्छीयां सकनककलां काञ्चिदाभां भजे स्म ॥ १२ ॥
भूयोऽगस्त्यं प्रणम परमं दैवतं वै धराया-
स्तेजोराशिं तपनतपसं जग्धवातापिवीर्यम् ।
यश्चादित्यं विपुलशिखरैश्छादयन्तं च विन्ध्यं
योगीवोच्चैरयतमनशं वृत्तिजातं रुरोध ॥ १३ ॥
यः पाथोधेः सलिलमखिलं पक्षिकारुण्यकोपात्
पातुं पाताकृत कुतकतो हस्तगोकर्णतीर्थे ।
लेखाधीशैस्स्तुत इजमदं यश्च धूलीचकार
श्रेयो लोकः कथमनुभवेत् सत्तिरस्कारकारी ॥ १४ ॥
येन प्रत्तं समहतगुणं शार्ङ्गमाजौ धनुर्मे
बाणोऽमोघो वनजजहितोऽक्षय्यतूणी च खड्गः ।

चञ्चच्चर्मा खलवधकृते यौगपद्यं दिदृक्षुः
काले राष्ट्रव्यसनहृदये सङ्गमं क्रान्तिशान्त्योः ॥ १५ ॥

आशीर्वादान्मुनिवरमुखात् पाद्मपाथेयपायं
लब्ध्वा जग्ध्वा शुचिफलरसं स्वस्थचेताः प्रगच्छन् ।
स्थानं द्रष्टास्यथ सुमहितं गैध्रराजं जटायो-
र्यस्यायुर्मे लसदधिजटं तेन सार्थो जटायुः ॥ १६ ॥

तत्त्वं गत्वा मम ततसखाध्यासितं स्थानमीड्यं
श्रद्धातोयं वितर मधुलिड्वर्गिणे मेऽथ पित्रे ।
यो मन्नेत्राम्बुरुहविगलद्बाष्पधाराभिषिक्तो
यातो लोकं हरिहरनुतं दुर्लभं त्यागिनः किम् ॥ १७ ॥

गोदावर्या हिमघनवने स्नाहि विश्रामहेतो-
र्भूनन्दिन्या नलिनचरणस्पर्शतः पावितायाः ।
सीतावक्षोरुहविघटनाभग्नवीचिस्स्रजो वै
ब्रह्माणीश्रीकुधरतनयापूजिताया हितायाः ॥ १८ ॥

गौतम्यास्त्वं पुलिननलिनीं भिक्षये भिक्षुरूपी
भैक्ष्यं पेयं मधुरमधुरं सारघं चार्घ्यहेतोः ।
सीताभिक्षाक्षणपरिचिता शङ्कतां मा दशास्यं
त्वामप्येषा मधुपमबला प्रायशः संशयालुः ॥ १९ ॥

स्नात्वा जप्त्वा दिवसमणये सारघार्घ्यं प्रदाय
प्रीतः प्रेयाः किल मम कुटीं संस्थिता पञ्चवट्याम् ।
यस्यां सीतावदनवनजे सादरस्त्वत् सधर्मा
सन्ध्याकालं न समगणयं पक्षिभिर्बोधितोऽपि ॥ २० ॥

निर्गच्छंस्त्वं बहिरथ सखे स्थानमालोकयेस्तत्
यस्मिंस्तिष्ठन्नवनितनया सल्लसद्वामभागः ।
बिभ्रच्चापं निशितविशिखं दिव्यतूणीरयुग्मं
तापस्येऽप्यप्रतिमविभया कामकोटीर्विजिग्ये ॥ २१ ॥

यस्मिन् व्रीडद्रतिशतरुचिं विश्वविश्वैकनारीं
नारायण्या अपि बहुमतां सीरकेतोः सुपुत्रीम् ।
जग्धुं सीतामिव विधुवधूं राहवी चाभियाता
मायायोषा कुणपभगिनी लक्ष्मणेन व्यरूपि ॥ २२ ॥

http://www.jagadgururambhadracharya.com

सन्ध्याकाले मधुप वसतिं कञ्जमन्वेष्टुकामः
पश्येः काञ्चिद्गिरिवरगुहां पद्मिनीसद्ममञ्जुम् ।
यस्यां रक्षःसमरसमये सौम्यसौमित्रिसाह्या
सीता गुप्तोपनिषदि यथा ब्रह्मविद्या सभोधा ॥ २३ ॥
विश्रम्याले निशि वनरुहे प्रातरेव प्रबुद्धः
पश्येः प्रीतः पुनरपि कुटीं प्रेक्षणीयां मदीयाम् ।
यस्या द्वारे जनकसुतया लालितायास्तुलस्याः
दिव्यामोदे जहति मधुपा नन्दनं गन्धगृह्याः ॥ २४ ॥
पश्येः पार्णे हरिमनशनं पिञ्जरे बद्धमौनं
कीरं धीरं शयितमिव तं विह्वलं नेत्रनीरम् ।
यं श्रीर्नित्यं निजमिव सुतं दाडिमीबीजराजी-
भोजं भोजं मदनघगुणान् पाठयामास पाठ्यान् ॥ २५ ॥
नो विस्मार्या क्वचिदपि चलच्चेतसा मित्रभार्या
श्रद्धाकार्या क्षणमपि सखे सारिका सन्निवार्या ।
स्नेहाकार्या शुकपतिसखी साम्प्रतं मूकभावं
पश्चात्तापं जड इव गता दुस्सहः सद्वियोगः ॥ २६ ॥
पश्येः स्वर्द्रुद्रवसुमनसां वाटिकां वाटिकाप्ता
सीता यत्र प्रशमितरुजा पुष्पचायं चरन्ती ।
लुब्धा मायाकनकहरिणे प्राहिणोन्मां तमाप्तुं
नूनं नारी नयति निरयं नैर्ऋतिं भूरिलोभः ॥ २७ ॥
यं नो शम्भुर्न च वनजभूर्नर्षयो नैव सिद्धाः
शेकुर्द्रष्टुं क्षणमपि सखे निर्विकल्पे समाधौ ।
सोऽहं मायामृगमनुसरन्धावमानः स्म खिद्यो
किं किं कृच्छ्रं ननु न लभते कामिनीचाटुकारः ॥ २८ ॥
रेखां पश्येस्तदनु धनुषा निर्मितां लक्ष्मणेन
त्रातुं कृच्छ्राद्धरणिजनुषं शास्त्रवाङ्मामिवार्षीम् ।
यां लङ्घित्वा कपटयतिना सङ्कटं प्राप सीता
मर्यादां हा किमिह सुखिनी स्याद्व्यतिक्रम्य नारी ॥ २९ ॥
मय्यादातुं कनकहरिणं दूरगे धन्विधुर्ये
मामन्वेते मगधतनयानन्दने शून्यमेत्य ।

जह्रे सीता कुणपपतिना हव्यधारा शुनेव
स्त्रीमप्यार्यां तुदति नितरां क्वापि लोभोऽतिशायी ॥ ३० ॥
जिघ्रन् नानाकुसुमसुरभिं वन्यवृक्षाननेका-
नारोहंस्त्वं कुलखगकुलैः काण्डसङ्क्लृप्तनीडान् ।
पश्यन् पर्णैरनिलपतितैः काननं चावकीर्णं
मन्दं मन्दं व्रज जनकजाजीवनाशो यमाशाम् ॥ ३१ ॥
त्वं त्वं पश्येस्तम इव लसद्विग्रहं विग्रहाढ्यं
भग्नेष्वासं त्रुटितविशिखं रक्तसंव्याप्यरण्यम् ।
यस्मिन् देव्यै दिगिभशिरसा युद्ध्यमानो जटायुः
स्वायुः स्वाहाकृत परहितप्राणवन्तो हि सन्तः ॥ ३२ ॥
यस्मिन् रक्षोनिशितविशिखैराहतं तं जटायुं
क्रोडे कृत्वा नयनसलिलैर्लूनपक्षं व्यसिञ्चम् ।
मय्यभ्यर्णे स्थितवति जहज्जीविते जीवितेशा-
द्यो मत्प्रापत्परमसुकृती भुक्तिमुक्ती सभक्ती ॥ ३३ ॥
यत्रारोप्य स्वकरनिचितां सच्चितां गृध्रराजं
राजद्राजीवनयनजलोऽदान्मुखाग्निं स्वपित्रे ।
श्रद्धेयाद्वै किल दशरथाद्भक्तिमस्मिन् विधाय
श्राद्धं चक्रे ननु दशगुणां सज्जना नो कृतघ्नाः ॥ ३४ ॥
यस्यास्त्वं वै भसितकणिकां भूतये भूभुवो भोः
गच्छागस्त्याचरितहरितं बिभ्रदाकाशगामी ।
यो वै सीतामिव सुतवधूं त्रातुमात्मानमीशं
नारेर्मत्वा शुगनलमहाज्वालया स्वं ददाह ॥ ३५ ॥
भूयः पश्येर्यमदिशि सखे जाङ्गलं घोररूपं
काबन्धं त्वं धृततनुमहाविश्वबन्धं यथार्थम् ।
यत्राबद्धो भवभयजगद्बन्धुकृद्यापि दोर्भ्यां
रक्षोबाहू मुनिरिव जगच्छोकमोहौ न्यकृन्तम् ॥ ३६ ॥
मार्गश्रान्तिं शमयितुमलं श्रामणं स्वाश्रमं भो
गच्छाभीष्टं परमतपसा पावितं यच्छवर्याः ।
यत्पादाब्जस्पृशनघमभूत्पूर्वमासृग्वशादं
पम्पानीरं सुरधुनिमहस्तीर्थपादा हि सन्तः ॥ ३७ ॥

http://www.jagadgururambhadracharya.com

नाहं तृप्तः शतहयमखैरिज्यमानो मघोना
नैवर्ङ्मन्त्रैः ऋषिनिगदितैः सामभिर्नो यजुर्भिः ।
यावन्मातर्पयत शबरी सत्फलैः स्वादुमूलैः
कोसल्यातोऽप्यति बहुमता भाववश्योऽहमीदृक् ॥ ३८ ॥
यद्यप्येषा शबरतनया मन्मुखाम्भोजभृङ्ग
नेत्राक्षेत्रं शबररचितं सम्परित्यज्य याता ।
मत्साकेतं सुरमुनिनुतं मातृका मे तथापि
त्वं तद्धूलिं धर शिरसि भो श्रेयसे सन्नमस्या ॥ ३९ ॥
तत्रत्यां त्वं वद बदरिकां मूर्ध्नि मूर्धाभिषिक्तो
द्रुतेशानां विरहशमनादीक्षया दीक्षितानाम् ।
एवं पश्यन् विपुलविपिनं पाथसा पूतपापां
पश्येः पम्पां घनवनधनां द्यामिवापां सशम्पाम् ॥ ४० ॥
तस्याः गच्छेर्हरिहरिति भो दुर्गमं भूविभाग-
मुच्चावच्चं कठिनकठिनं तीक्ष्णपाषाणजुष्टम् ।
घोराकारं कुटिलतृणकं कण्टकानां शितानां
जन्मस्थानं दुरितदमिवाविष्कृतं शर्कराभिः ॥ ४१ ॥
तत्रालोक्यो लुलितमृदुतः पर्वतस्तीक्ष्णितास्मा
यस्मिन्नृष्या ऋषिगणतपोमूकिता ऋष्यमूकः ।
यस्याधस्ताद्धृतवटुवपुर्गीतमेयो प्रमेयो
भिक्षाव्याजादवनिमवितो वामनो वा लुलोके ॥ ४२ ॥
यत्र भ्राम्यद्भ्रमितमनसा वासुधेयीवियोग-
भीमाम्भोधौ तरणिसदृशो मज्जता सानुजेन ।
विप्राकारः पुरहरतनुर्जातरूपाचलाभो
दृष्टो दृष्टेर्फलमिव मया गौतमीगर्भजन्मा ॥ ४३ ॥
बिभ्रद् विप्रः शुभचरणयोः पादुके पादचारं
कुर्वन्नुर्व्यां धृततनुशिवं गौरवर्णः सवर्णी ।
मन्दं मन्दं भुवमवतरन् पर्वतादृष्यमूकात्
कश्चित्कान्त्याविरिव ददृशे दक्षिणस्यां मयार्भः ॥ ४४ ॥
सुग्रीवं मद्विरहितभयं कर्तुकामो हनूमान्
भिक्षूद्योगी हरिरिव बलिं भिक्षयन्मां सबन्धुम् ।

http://www.jagadgururambhadracharya.com

यत्रागच्छद्दशमुखवृहद्वाटिकाधूमकेतु-
र्हेतुर्भीतेर्निशिचरपतेः कीर्तिकेतू रघूणाम् ॥ ४५ ॥
यत्रालोक्यावगणितनवाम्भोदशुभ्राम्बुजातौ
तातावावां सधनुरिषुभृद्व्यग्रनाराचखङ्गौ ।
पृष्ट्वा सृष्ट्वा वचनरचनां तोषयन्मां मरुद्भूः
पृष्ठे धृत्वा हरियुगयुतो पुप्लुवे द्यामिवेभः ॥ ४६ ॥
तत्रावश्यं त्वमुपरि सखे ऋष्यमूकस्य गत्वा
पश्यद्ध्वान्तैर्निविडनिविडां साधुशैलीं गुहां ताम् ।
यस्यां सख्यं दिनकरभुवा साग्निसाक्ष्यं समं मे
ज्ञाने मात्रा गुरुरिव हरेः कारयामास मर्कः ॥ ४७ ॥
ईक्षेथास्त्वं मधुप मधुपव्याप्तपर्णप्रसूना-
माधां वल्लीमिव सुरतरोर्नागपुष्पीं प्रफुल्लाम् ।
त्रातुं घोरान्मघवतनयाद्यां सुकण्ठस्य कण्ठे
देष्टा मृत्योर्मनसि यतितुर्मन्त्रविद्यामिवाद्याम् ॥ ४८ ॥
तां त्वां देवासुररणलसद्रङ्गभूमिं यथाद्यां
ज्ञानाज्ञानाप्रमथिततलां शान्तिसीमां यथा गाम् ।
वीरोत्साहप्रकटितगुणां सुस्थलीं दर्शयामि
क्रुध्यन् हारं न्यहनमिषुणा यत्र सुग्रीवमित्रः ॥ ४९ ॥
एवं भ्रान्त्वा भरतधरणीं धारयेणीं दिदृक्षुः
सन्देशान्मे मनसि कलयन् वक्ष्यमाणान्प्रियायै ।
रामादेशाद्दिशि ऋषिपतेः कुम्भजस्य प्रयाहि
स्वस्ति ब्रूमो भवति सुखदो भृङ्ग पन्थाः शिवस्ते ॥ ५० ॥
किष्किन्धातो व्रज पुनरले वाचिकं मे गृहीत्वा
पीत्वा पेयं मधुवनतरूद्भूतपुष्पासवं त्वम् ।
सर्वेषां सन्मनसि महतामुत्सवं वर्धयन्वै
वैदेहीक्षाप्रजवितगतिर्दक्षिणो दक्षिणाशाम् ॥ ५१ ॥
त्वां गुञ्जन्तं सरसिजगतं वल्लकीमित्ररावं
भावं भावं भवभवकरं माधवं मन्मथेष्टम् ।
मोदं मोदं मुदितवदना भारता भारतीशा
सौमङ्गल्यं सुसृजति सरस्वत्यवश्यं शुभाय ॥ ५२ ॥

http://www.jagadgururambhadracharya.com

त्वां गायन्तं मधुरमधुरं मञ्जुमारन्दमत्तं
शीघ्रं सीतामरिगृहगतां जीवयन्तं स्वगीर्भिः ।
नूनं श्रान्तं पथिपथिकपं शान्तरावं स्वभावं
सत्कर्ता वै सुरसुमरसैः शारदाहंस उच्चैः ॥ ५३ ॥
एवं याता सपदि भवता शृण्वता दक्षिणाशां
गीतं श्राव्यं सुमधुरतमं कम्रकार्णाटकीनाम् ।
पश्चादित्वा मुरहरपुरीं विष्णुकाञ्चीं षडङ्घ्रे
साक्षात्कार्यः किल वरदराड् श्रेयसे जागरूकः ॥ ५४ ॥
तस्या गच्छेर्गगनगतिको भौमवैकुण्ठनाम
श्रीकावेर्यास्तटमभिलसत् पुण्यपुञ्जप्रतिष्ठम् ।
यस्मिन् पश्चान्मदनुसरणः पङ्क्तिमौलेः कनिष्ठो
रङ्गं लङ्कानभिमतगतिं स्थापयिष्यत्यनन्तम् ॥ ५५ ॥
आन्ध्रान्मद्रानुदधितटगान्केरलांश्चैव रम्यान्
पश्यन् भ्राम्य भ्रमर मुदितः कम्रकन्याकुमारीम् ।
यस्यां काचिद्विमलतपसा राजकन्येड्यवेशा
श्रद्धेवोमामृडयत मृडं प्रत्ययं शास्त्रजन्यम् ॥ ५६ ॥
गच्छेः प्रीतः पुनरपि ततस्तीरमब्धेरुदत्त्वं
वैदूर्याणामिव सुपयसां वीचिविक्लिन्नशष्पम् ।
यस्मिन् सुप्तोत्थित इव कपिर्जाम्बवद्बोधितः सन्
योगीवाब्धिं भवनिधिमसौ लङ्घिता वायुसूनुः ॥ ५७ ॥
यत्रस्थोऽहं जलधिममदं कार्मुके कर्तुकामः
सन्धातास्मि प्रबलमनलज्वालकं ब्राह्ममस्त्रम् ।
कुप्यन् सिन्धुं जडमिव पशुं दण्डयन् दण्डितारिः
संरक्ताक्षो मगधतनुजासूनुना छन्दयिष्ये ॥ ५८ ॥
यत्र स्थित्वा जनकतनयाविप्रयोगाब्धिमग्नो
बिभ्रद्वल्कं कपिपतिसखः पञ्चमं भक्तमश्नन् ।
आगच्छन्तं शरणमनुजं रावणस्याभिसिञ्चन्
लङ्कां राज्ये प्रथमविरुदं सम्प्रपत्स्ये प्रपत्तेः ॥ ५९ ॥
तं लङ्घित्वा मम कुलगुरुं निष्प्रमाणाम्बुवाहं
लङ्कायां त्वं प्रमदवनिकासंस्थितां मित्रपत्नीम् ।

http://www.jagadgururambhadracharya.com

साक्षात्कर्तास्यमलनयनां खिद्यमानां निमग्नां
शोकाम्भोधावतरिमिव तां वेपमानां विनाथाम् ॥ ६० ॥
श्यामां क्षामां क्षपितहृदिभूकुङ्कुमामश्रुधारा-
सारैर्नित्यं नमितवदनाम्भोरुहां रुग्णचित्ताम् ।
सूर्येन्दुभ्यामिव विरहितां कौहवीं सान्ध्यवेलां
सीतां भीतामिव हरिणिकां द्रक्ष्यसि त्वं शुनीषु ॥ ६१ ॥
स्मारं स्मारं मम गुणगणान् जातमूर्छां शुभाङ्गीं
पातं पातं भुवि च मणिभिर्भोगिभार्या विमुक्ताम् ।
ताडं ताडं स्वमुर उदिते पार्वणे शर्वरीशे
विश्लेषार्तां निजदयिततश्चक्रवाकीमिवेयाः ॥ ६२ ॥
त्यक्ताहारां मलिनवसनामुज्झितस्नानचर्चां
नीरन्ध्राक्षिप्रपतितजलां सौम्यसाध्वीमचर्चाम् ।
स्थित्वाशोकेऽप्यहह विषमे शोकसिन्धौ निमग्नां
सीतां पश्य प्रतिपदि कलां शौक्लपक्ष्यामिवेन्दोः ॥ ६३ ॥
अस्वस्थासुर्विगतचतुरा चातुरीशून्यचित्ता
संस्काराज्ञा स्मरणविकला मौढ्यमूर्छत्षडङ्गा ।
भग्नोत्साहा जडितहृदया मौनवाणी विवाणी
भौमी भाति प्रतिपदि विपद्धिप्रविद्धेव विग्ना ॥ ६४ ॥
न स्नानं नो वसनममलं मार्जनं नो न लेपं
नैवाभ्यङ्गं न कुसुमकृतिं साधनं नो कचानाम् ।
न क्षुत्तर्षं न खलु शयनं न प्रबोधं प्रिया मे
जानीते भो खलगृहगता योगिनी वा समाधौ ॥ ६५ ॥
संस्थाशोकाभिधतरुतलच्छाय ईशेन नीता
सीता शून्यात्कुपिशितभुजां हव्यपात्री शुनेव ।
घोरारण्ये कुटिलहरिणा गौर्वृता क्रन्दतीव
व्यग्रात्मासौ निशिचरपुरे नात्मनाथं विदन्ती ॥ ६६ ॥
स्वाहाकारात्परिचितचरी सुन्दरी सोदरी सा
सद्दृक्षाणाममृतलहरी वा प्रिया मामकीना ।
हाहाकारं करुणकुररीवालपन्ती शपन्ती
स्वं दौर्भाग्यं किमु न कुरुते व्याकुलः शोककाले ॥ ६७ ॥

रात्रौ मत्वा विधुमपि रविं पूजयत्यर्घदायं
प्रातर्भानुं शपति बहुशः कल्पयित्वा शशाङ्कम् ।
अग्निं कृत्वा शिशिरसलिलं स्नातुकामा निषिद्धा
सख्या रामा ननु सरमया किं वियोगिन्यवद्यम् ॥ ६८ ॥

दृष्ट्वा नूनं विरहदहनज्वालया ज्वाल्यमानं
तूलाकारं वपुरपि निजं जानकी जातशोका ।
दृग्भ्यां शीघ्रं सललिमनघा संश्रयन्ती सपत्नात्
पाति स्वासून्मम किल कृते गेहिनी न स्वकार्था ॥ ६९ ॥

तस्या देव्याः श्रवणपुटयोर्मञ्जुगुञ्जन्नलीन्द्र
मत्सन्देशं वद वदनतो वावदूकाग्रगामिन् ।
इच्छन्निच्छामयविरहिणीजीवितं जीविताहैं
दूरेशायाः परममगदं वाचिकं भर्तुराहुः ॥ ७० ॥

सीते सीते विभवविभवे संस्कृतिश्रौतरूपे
भास्वद्वंशप्रसवमहिषि प्रेष्ठरूपस्वरूपे ।
मच्चित्तालिप्रवरविलसद्वक्त्रपङ्केरुहे हे
न स्वर्गोऽपि प्रणयिनि शुभे रोचते मे विना त्वाम् ॥ ७१ ॥

श्वश्रूणां या नलिननयनोदारतारायमाणा
पुत्रीचक्रे सततमथ यां मत्पिता चक्रवर्ती ।
लङ्कायां सा त्वमहह सखि प्रोज्झितप्राणनाथा
कोकीवार्ता निशि गतसुखा खिद्यमाना न भासि ॥ ७२ ॥

प्रत्यावृत्तं श्रमितमुटजं नित्यमाखेटतो मां
याभ्यागच्छः ससलिलकरा स्मेरपङ्केरुहास्या ।
तन्मेदानीं तव विरहजं चण्डदावाग्निमार्तं
रोद्धुं नेच्छस्यहह किमुतं प्रेक्षमाणा दहन्तम् ॥ ७३ ॥

या मां द्रष्टुं ननु न सहसे स्माप्तखेदं तृषार्तं
तूर्णं बाष्पाम्बुरुहनयना वीजयन्त्यञ्चलेन ।
सोऽहं देव्या विरहदहनेनेह दन्दह्यमानः
पीत्वाश्रूणि प्रकृतरजनी हीननिद्रो नयामि ॥ ७४ ॥

झिल्लीरावे तव सखि रणन् नूपुरं कल्पयित्वा
रात्रौ धावन् तमसि तरुतो घूर्णितो घटयमानः ।

http://www.jagadgururambhadracharya.com

सीते सीते प्रलपितमिति व्याहरन् मत्यचेष्टः
कारुण्येनोच्छ्वसितमिव ते देवरं देवयामि ॥ ७५ ॥
नैशीथेऽहं गगनगदिते त्वत्स्वरं भावयित्वा
धावे धर्तुं निविडगहने गोपितां त्वामिवार्तः ।
श्लिष्टो वल्ल्या तव भुजलतातुल्यया तुल्यशीलो
भ्रात्रा रुद्धो प्रपतनभियैवैकपत्नीव्रतस्य ॥ ७६ ॥
पश्यन्तो मां कनकहरिणप्रेप्सया हारयित्वा
मौढ्याद्देवीं प्रतिवनमथो सानुजं मार्गमाणम् ।
साशङ्कान् स्वान् त्वरितगतिकान् वारयन्तो हरिण्यः
मा भैष्टेति प्रतिभयमहो क्वास्ति हेमैणहन्तुः ॥ ७७ ॥
या वै सीते विलखितकपिं वीक्ष्य चित्रेऽनुजेन
त्रस्यन्नेत्रा रुदितवदना मातुरङ्कं जगन्थ ।
सा त्वं लङ्कापतिवनगता रक्षिता राक्षसीभि-
र्भीमाक्षीभिः कथमथ भवेर्निष्ठुरो हा विधाता ॥ ७८ ॥
या वै मात्रा कनकभवने वर्तिकां दीपकस्य
प्रत्याख्याता प्रचलहृदया कर्तुकामा प्रिया मे ।
सा लङ्कायां विजनविपिनेऽशोकशाखातले त्वं
किं स्या रक्षोविकटवपुरालोकिनी धिग्विधे त्वाम् ॥ ७९ ॥
कौसल्या यां मधुरपयसा मिश्रितं कामधेनो-
र्भक्तं भक्त्या सुखमिव सुतां भोजयामास देवीम् ।
सा त्वं नीता निशिचरपुरीं त्रायमाणा स्वशीलं
त्यक्ताहारा कथमिव भवेर्हा विधे क्रूरकर्मन् ॥ ८० ॥
आत्मासि त्वं मम सुगृहिणो दारभूतोऽतिपूतो
व्यापृण्वानो जगति सकले शक्तिमित्वा त्वदीयाम् ।
सोऽयं शून्यो ननु विरहितः साम्प्रतं नाम देव्या
कार्यैः सर्वैरहमिव मृतो देहवद्भामि भामे ॥ ८१ ॥
शीतांशुर्मां प्रदहति भवंश्चण्डचण्डांशुबिम्बः
सर्पश्वासो मलयनिलयो मारुतो मां निनोति ।
भृज्यन्तीव श्रितशुचिगुणा शारदी रात्रिरेषा
सर्वं सीते तव विरहिणो भासते मे प्रतीपम् ॥ ८२ ॥

त्वं मे शक्तिर्जगदगजनिस्थानभङ्गैकलीले
त्वत्सत्तातश्चितिमधिगतो व्यापृतोऽन्तस्त्रिलोक्याम् ।
सीते सीदाम्यथ विरहितश्चादिशक्त्या भवत्या
शक्त्या हीनः कथमु घटतां कोऽपि कस्मिंश्चिदर्थे ॥ ८३ ॥
नूनं नूत्नस्तरुकिसलयो वह्निवन्मां दिधक्षु-
र्वर्षावार्दोज्झितजलमलं तप्ततैलायते मे ।
राकाचन्द्रस्तरुणतरणिः कालरात्रिस्सुरात्रिः
सर्वं सीते तव विरहिणो वैपरीत्येन भाति ॥ ८४ ॥
कर्णे शोकं खनति कुटिलः कोकिलः कोऽपि कीलं
काकीभूतः पुनरपि बकन्हन्ति हंसस्तु हर्षम् ।
नृत्यन्नन्दन्निव सदयितो रौति मह्यां मयूरो
मां धिक्कुर्वन् रसति दहनं दग्धचञ्चुस्चकोरः ॥ ८५ ॥
दृष्ट्वारण्यं समृगमिथुनं विघ्ननृणां शरण्यं
रामो रामां मृगदृशमहो नाप्नुवन्नुन्नसौख्यः ।
कौसल्यायास्तरुणतनयस्त्वद्य तापिच्छनीलो
नीलासख्या इह दुहितरं त्वां समन्वेषयामि ॥ ८६ ॥
कुञ्जे कुञ्जे तरुषु तरुषु स्वावटे स्वावटे च
शैले शैले सरसि सरसि भ्राम्यमाणौ भ्रमेण ।
नद्यां नद्यां दिशि दिशि दृशः पातयन्तौ विषण्णौ
भूयोऽरण्येष्विव सुभिषजौ स्वोषधिं त्वां विचिन्वः ॥ ८७ ॥
पृष्ट्वा पृष्ट्वा हरिहरिणकान् पक्षिणो वै षडङ्घ्री-
न्दृष्ट्वा दृष्ट्वा वनतरुलतास्ताश्च तापिच्छमालाः ।
सृष्ट्वा सृष्ट्वा चिरविरहजं तीव्रतापोत्थदाहं
स्पृष्ट्वा स्पृष्ट्वा मनसि निहितां त्वां कथञ्चिद्धरामि ॥ ८८ ॥
त्वद्विश्लेषोद्धतविरहजो जातवेदा विषण्णं
यावद्दग्धुं क्रमत इषुभिस्ताडितं मां स्मरेण ।
तूलाकारं झटिति करुणोच्छ्वाससंवर्धितौजा-
स्तावन्नेत्रे शमयत इमं स्वार्थवृत्तिर्हि लोकः ॥ ८९ ॥
सम्मज्जन्तं विरहवनधौ मग्नवैवेकपोतं
सर्पिर्दीपं स्मरणपवनेनेव निर्वाप्यमाणम् ।

दृष्ट्वैकान्ते मरणशरणं दूरसाहाय्यमित्रं
चित्तं सीते यदि न दयसे निर्दयाः किन्नु योषाः ॥ ९० ॥
राज्यं यातं धनमपगतं बान्धवा दूरिता मत्
सौख्यं लुप्तं विपिनमवितो जन्मभूमेर्वियुक्तः ।
त्वं चैकासीर्मम नलिनदृग्वर्तिकावत्सखी मे
सापीदानीं नहि निकटगा हा हतोऽहं विधात्रा ॥ ९१ ॥
साकेतेऽप्यत्यजदथ च मामर्थितं राज्यलक्ष्मी-
मार्गे भूयः किल समजहात्सर्वतः सौख्यलक्ष्मीः ।
त्वं चारण्येऽप्यहह समभूर्दूरगा गेहलक्ष्मी
-र्नूनं स्त्रीभिस्तिसृभिरनघे वञ्चितोऽहं विपद्ये ॥ ९२ ॥
हारं नारोपयमहमहो देवि कण्ठे विभाव्या-
स्मत्संश्लेषेऽन्तरमतिशयं त्वत्परिष्वङ्गचुञ्चुः ।
हा हा धात्रा किमिह विहितश्चावयोर्मध्यवर्ती
पापिष्ठोऽयं लवणसलिलः सागराणां प्रसूतिः ॥ ९३ ॥
या मां भद्रे जनकनगरोद्यानकुञ्जे सशेषं
कुर्वाणं त्वं न समकलयः पुष्पचायं सचायम् ।
रामस्त्वन्यः किमिह विहितो नामदेव्या विदूरे
किं वा नारी सुलभमृदुतां स्माजहास्याधिलङ्कम् ॥ ९४ ॥
सीते शीतामलकररुचे रोचिषा रोचिताशे
मन्दस्मेराननजितविधो दामिनीदन्तपङ्क्ते ।
सौन्दर्याम्भोनिधिलहरिके मञ्जुमाधुर्यसीमे
कर्ह्येष्यामि त्वदधरसुधासीधुपानैकभाग्यम् ॥ ९५ ॥
पत्रेऽपत्रे मरमररवे मन्दवाते प्रभाते
पूर्वाह्णे वा विकसति नवे नालिनेऽलीनभृङ्गे ।
मध्याह्ने त्वं तपति तरणौ सान्ध्यकाले निशायां
सीते नैकं क्षणमपि मया क्वापि विस्मर्यसे भोः ॥ ९६ ॥
या मां द्रष्टुं ननु निजपितुर्वाटिकायां सहालि-
र्वारं वारं खगमृगतरुव्याजतः स्माभियासि ।
सैवेदानीं हरिणविहगैः शाखिभिश्शप्यमानं
पश्यन्ती त्वं किमु न दयसे स्त्री निसर्गाद्दयालुः ॥ ९७ ॥

http://www.jagadgururambhadracharya.com

निस्तेजस्को रविरिह यथा छायया त्यज्यमानः
कौमुद्यासौ ननु विरहितः शीतरश्मिर्यथाकः ।
अर्चिश्शून्यो न लसति यथा जातवेदा विधूमो
देव्या हीनोऽहमहह तथा भामि भामे न भामे ॥ ९८ ॥
हे मच्चित्ताम्बरविहरणे प्रातरुष्णांशुलेखे
हे मच्चक्षुश्चटुलचषकप्रेमपीयूषपात्रि ।
हे मच्छ्रोत्रामृतलहरिके सौष्ठवोद्भासिशब्दे
क्वासि क्वासि त्वमथ कथय त्वां कथं लोकयेयम् ॥ ९९ ॥
मन्दं मन्दं शशिकरनवोन्मेषहासं हसन्त्या
मुक्तादाम्ना हरिचरणजायुग्मकान्तिं हरन्त्याः ।
किञ्चित्किञ्चित्कमलमुकुलोन्मुक्तकेलिव्रजन्त्याः
श्रीसीतायाः मधुरमधरं क्वापि कामं पिबेयम् ॥ १०० ॥
स्वर्गे लोके ललितललनालालिता लोक्यसे चे-
न्नीता यद्राङ्गभसि महती संवृता सन्महोभिः ।
यद्वा याता तपसि तपसे तप्यमाना तपस्या-
मानेष्ये त्वां विशिखनिकरैरन्तरायान्निरस्यन् ॥ १०१ ॥
यद्वा सत्ये सति सदसतां दुर्विभाव्या विभाया
दीव्यन्ती वा तरलतरलैर्देविता देवनद्याः ।
आहर्तुं वा सुरवनमिता स्वर्णकिञ्जल्ककञ्जा-
प्यानेष्ये त्वां तदपि रभसा यत्नसाध्यं हि साध्यम् ॥ १०२ ॥
यद्वा नीता वियति विलसद्भानुभानौ सुभानो
राकानाथप्रसृमरकरैः साधु सङ्क्रीडसे चेत् ।
यद्वा गुप्ता प्रणयकुपिता नाकि नक्षत्रलोके
त्वानेष्ये त्वां सुमुखि बलतो मा कृथाः साध्वि शङ्काम् ॥ १०३ ॥
भूम्या भौमि त्वमथ पिहिता क्रुद्धया सागसे मे
स्वर्णैणानां ननु मृगयवे त्वत्प्रमत्ताय सीते ।
आहर्ता त्वां हरिरिव सुधां मातरं छन्दयित्वा
श्वश्रूः कुप्येत्कथमथ सुताप्राणभर्त्रे भवाय ॥ १०४ ॥
पाताले वा सुरपतिपवेस्त्रातुमात्मानमद्धा
दैत्येये चेद्विहितवसतिं वासुकेर्वासुधेयि ।

http://www.jagadgururambhadracharya.com

लोके लोक्या सुतलभवना वापि भो भोगवत्या-
मानेष्ये त्वां श्रुतिमिव हृतां देवि दैत्यैर्हयास्यः ॥ १०५ ॥
सप्तद्वीपा ननु वसुमती यावती दृष्टिदृश्या
तावत्यास्त्वां प्रसभमनघे यत्नतश्चाननेयम् ।
घोरारण्ये ननु गिरिगुहास्वाहिता वा निकुञ्जे
द्रष्टासि त्वामचिरमुचितामोषधिं ना गवीव ॥ १०६ ॥
मा भैषीस्त्वं प्रकृतिमृदुले क्रूरनक्तञ्चरेभ्यो
मा मा प्राणान् जहि जनकजे भर्तृजीवातुभूतान् ।
आगच्छामि प्रलयदहनोद्दामनाराचधन्यं
धन्वं धुन्वन्हरिरिव हरन् हारहर्षं हरीष्टः ॥ १०७ ॥
यस्या भर्ता भुवनविदितो धन्विधूर्यार्चिताङ्घ्री
रक्षोऽम्भोरुड्हिमकरशरा देवराश्चापि यस्याः ।
यस्यास्तेजस्तरुणतपनस्तप्यमानस्त्रिलोक्यां
तस्याः भीः किं हरिवरवधूः कुक्कुरात्किं बिभेति ॥ १०८ ॥
मा शङ्किष्ठा मयि निजकृते प्रीतिमल्पां सुमुग्धे
नाहं भद्रे निमिषमपि भो रागतस्ते विरज्ये ।
सामर्थ्येऽपि क्षपयितुमरीन् कालमत्र प्रतीक्षे
शोचत्यब्धौ विपदि सहसा ना सदा शीघ्रकारी ॥ १०९ ॥
मद्बाणाग्नौ शलभसुलभं शीघ्रमापद्यभावं
रक्षोलोको लुलितविभवो भूतिमैत्रीं गमिष्यन् ।
नाराचानां विमदमरुतां लक्ष्मणप्रेषितानां
रातारो मे सपदि शरणास्त्वामिवेन्द्राय सौम्याम् ॥ ११० ॥
यावद्वृत्तं तव न सुभगे ज्ञायते केनचिद्वै
तावत्कर्तुं किल न सुशकः सङ्कटः सैनिकानाम् ।
जानानोऽपि त्वदवनविधिं लोकमर्यादयाहं
बद्धो बिभ्रन् नरतनुमहो गूढसत्त्वो विभामि ॥ १११ ॥
त्वय्यासक्तोऽप्यहमनलसो देवि किङ्कृत्यमूढो
गूढोत्साहः सखिसशरदा वर्षया भग्नहर्षः ।
छन्नाकाशे स्तनति जलदे नृत्यति व्यालशत्रौ
सीदज्जन्तुर्विरहविकलस्त्वद्विहीनो बिभेमि ॥ ११२ ॥

अन्तर्धाय प्रकटिततनुर्व्योम्नि सौदामिनीयं
स्मेरास्यायास्तव किल दतां सौभगं स्मारयन्ती ।
झिल्लीरावस्तव चरणयोर्नूपुरैस्स्पर्धमाना
वर्षाकालो विरहिणमहो ग्रीष्मवन्मां दिधक्षुः ॥ ११३ ॥
मन्दं मन्दं चलति मलयो मारुतश्वासितस्ते
नीलं नीलं लसति गगनं कुन्तलं ते यथैव ।
पर्णात् पर्णात् पतति पयसो बिन्दुरश्रं यथा ते
वर्षाकाले सकलमपि मे त्वत्स्मृतीष्टं विभाति ॥ ११४ ॥
पी पी रामं रटति रमणी चातकस्यानुवेलं
स्वान्ते शान्ते त्वदधरसुधा तर्षमावर्धयन्ती ।
मेघच्छन्ने दिवस इषुभिस्ताडयन्मीनकेतु-
र्मामव्यग्रो रुजति नितरां धन्विनं धैर्यसेतुम् ॥ ११५ ॥
वर्षावार्भिः प्रगुणपयसाः प्लाव्यमानाः सवेगं
धारासारैः सपदि सरितः सागरं श्लेष्टुमुत्काः ।
एकैव त्वं विषमविजने काननेऽकैकसिन्धुं
क्रन्दन्तं मां भुजतरलिका नो परीरीप्ससे किम् ॥ ११६ ॥
एषश्चन्द्रो वियति पिहितो वारिदैः पूर्णिमायां
छन्नज्योतिः किमपि किमपि द्योतते प्रौष्ठपद्याम् ।
स्नातायास्ते चिकुरनिकरैराननं छाद्यमानं
मन्दं मन्दं स्मितरदलसज्ज्योत्स्नयेवेक्ष्यमाणम् ॥ ११७ ॥
एतद्व्योमन्युदजनयने विज्यमाहेन्द्रचापं
नानारागैर्लसदनुपमं सद्बलाकं विभाति ।
मत्सामीप्ये विविधकुसुमैर्मञ्जुसीमन्तमीड्यं
त्वद्वक्त्राम्भोरुहमिव शुभे मौक्तिकालक्तकान्तम् ॥ ११८ ॥
राकाकान्तं वनदपिहितं नाप्नुवन्भाद्रपद्यां
चीत्काराणां करुणमयुतैः पूरितः पूर्णिमायाम् ।
क्षुत्तृड्क्लान्तः प्रबलमनलं चन्द्रबुद्धिश्चकोरः
खादन्नास्तेऽहमिव विरही विस्फुलिङ्गं शुगग्नेः ॥ ११९ ॥
वर्षासन्ध्यासमयसलिलासारसङ्क्लिन्नपक्षा
नीडेष्वेते विहगपतयः पक्षगूढाः प्रियाणाम् ।

http://www.jagadgururambhadracharya.com

कूजं कूजं कलकलरवं रम्यरात्र्यां रमन्ते
रामस्त्वेको विरमति सुखाद्दूरितः स्वाञ्चलात्ते ॥ १२० ॥
वर्षाकाले गतवति लसद्व्योमचन्द्रोडुसूर्ये
व्यभ्रे शुभ्रे सुखदसरदोत्सारिते ध्वान्तकष्टे ।
पक्वे शस्ये सरसि विकसत्पद्मरोलम्बपुञ्जे
कर्तोद्योगं सपदि भवतीप्रापणे लब्धलक्ष्यः ॥ १२१ ॥
स्वात्यां पीताम्बुधरसलिले सौम्यसारङ्गरङ्गे
शाम्यत्तर्षे मुदितदयितादत्तहर्षप्रकर्षे ।
गुञ्जद्भृङ्गे शरदि शशिनोत्तालतुङ्गत्तरङ्गे
सिन्धौ बन्धुस्तपनजनुषः शीघ्रमायामि सुभ्रूः ॥ १२२ ॥
भास्वद्भानौ नलिनिदयिते चक्रवाके सुवाके
द्वन्द्वीभूय प्रकटितरतौ साधु सङ्क्रीडमाने ।
लब्धोद्योगे कृषकनिकरे सैरिके सीरकेतोः-
पुत्रीप्राप्तौ सपदि भवितास्म्याप्तनूत्नप्रयत्नः ॥ १२३ ॥
त्वद्दृङ्मित्रे ममतनुरुचौ खञ्जने कन्दकान्तौ
प्रीत्या याते विशदशरदं साध्वि सत्कर्तुकामे ।
प्राप्ते काले सुजनसुकृते मञ्जुमूर्तौ यथैते
प्राप्ता प्राचीमिव रविरहं राक्षसध्वान्तहारी ॥ १२४ ॥
गङ्गाद्यासु प्रतिहतमलास्वाप्तहंसोदकासु
स्वैरं दर्यां निनदति हरौ हर्षिते हारिणे ये ।
राकाधीशे क्षपितशमले बद्धदृष्टौ चकोरे
त्वत्प्राप्त्यर्थं सुघटितचमू राम एष्यामि शीघ्रम् ॥ १२५ ॥
पद्मामोदाकलितमधुपस्वच्छखेलज्जलेषु
स्फाटिक्यम्भोजनितविमलस्फीतमुक्तामयेषु ।
व्यभ्राकाशे शरदुडुपतिप्रांशुराजन्निशासु
प्राप्तास्मि त्वां हरिरिव सुधां भग्नलङ्केशदर्पः ॥ १२६ ॥
सञ्जाग्रत्यां शरदि सुषमामाधुरीचोरितान्त-
र्गूढध्वान्ते शशिनि विभया भात्युदन्ते दिगन्ते ।
प्रातर्भास्वद्भवकरकरोत्फुल्लपद्मे तडागे
हन्तास्म्यर्कः किल शरकरैस्त्वद्धरध्वान्तमारात् ॥ १२७ ॥

http://www.jagadgururambhadracharya.com

दोषादोषाकरकरसुधाप्रोल्लसत्कैरवेषु
द्राक्पत्रान्तर्दुरितसुषमाकौमुदीकेषु सत्सु ।
शस्यैर्लूनैः किल परिवृते भूतले लब्धयोगः
प्रह्वैर्युक्तः कपिवरभटैरेमि रक्षःकृतान्तः ॥ १२८ ॥
भिक्षां याते दिशि दिशि परिव्राजके ब्रह्मचारि-
ण्युच्चैर्वेदं पठति विजये प्रस्थिते भूमिपाले ।
उद्योगार्थं व्रजति वणिजि व्यापृते कर्मणि स्वे
साकं मर्कैर्दिगिभशिरसं दण्डयन् प्रैमि लङ्काम् ॥ १२९ ॥
आयातायां शरदि गगने तारकासुप्रसन्ने
शान्ते झञ्झाझडितपवने धावितायां च धूलौ ।
कर्तुं पूजा निशिचरपतेश्चण्डिकायाश्शिरोभि-
र्लङ्कामेष्याम्यथ जलनिधौ बद्धसेतुः ससैन्यः ॥ १३० ॥
जानामि त्वां क्षणमपि मया विप्रयुक्तां कथञ्चित्
प्राणान् धर्तुं ननु नहि सतीं पारयन्तीं परेष्टाम् ।
दूरीभूतामिव सुमणिना भोगिनी मर्तुकामां
किं वा कुर्यां तदपि बलवान् क्रूर एवात्र कालः ॥ १३१ ॥
मत्सीं विग्नामिव विलुलितां वारितो नाप्नुवन्तीं
स्वं भैषज्यं मृतिमतितरां श्रेयसीं मन्यमानाम् ।
जाने सीतामरिपुरगतां मद्वियोगासहिष्णुं
गूढैश्वर्यो दिनमनुसरन् दुर्विपाकस्य भुङ्क्ते ॥ १३२ ॥
सीते सीते सुभगसुषमे मैथिलीवैजयन्ति
स्वश्वश्रूणां गतमलमनश्चातकस्वातिवर्षे ।
हर्षोत्कर्षप्रसविनि महामोदकैशोरकान्ति-
श्लिष्टे क्लिष्यस्यहह विजने कुक्कुरीभिर्मृगीव ॥ १३३ ॥
एकः सीताविरहजलधिर्गर्जति क्रूरकर्मा
भूयो भीमो लवणवनधिर्योजनानां शतानाम् ।
द्वावप्येतावनघ उदधी केन मार्गेण तीर्त्वा
त्वद्वक्त्राम्भोरुहरसमहो नेत्रपात्रैः पिबेयम् ॥ १३४ ॥
चित्रीभूतं कपिवरवपुः प्रेक्ष्य सौमित्रिक्लृप्तं
सीते भीता स्म भवसि भयान्मातुरुत्सङ्गसङ्गा ।

http://www.jagadgururambhadracharya.com

सा त्वं सम्प्रत्यतिविकटदृग्वक्त्रनासानिशाटी-
र्दृष्ट्वा प्राणान्किमिह धरसे निर्घृणो हा विधाता ॥ १३५ ॥
या वै श्रुत्वा श्रुतिपटभिदं भीषणं सिंहनादं
सीतारण्ये मम हृदिगता वेपते स्मातिभीता ।
सैवेदानीं दशमुखहृता तर्जनं राक्षसीनां
किंवा श्रोतुं प्रभवति विधे निर्जने नीरजाक्षी ॥ १३६ ॥
यायोध्यायां जननिसविधे वाग्भिरत्युज्ज्वलाभि-
र्नैच्छद्वस्तुं क्षणमपि तदा साधु सीतानुनीता ।
दूरीभूता मृगमृगयुतः साम्प्रतं सा मृगाक्षी
क्षामा श्यामा श्वसिति किमहो कोटिकूटे त्रिकूटे ॥ १३७ ॥
चारित्र्यं स्वं निशिचरपतेस्त्रायमाणानवद्यं
शोभां धत्ते हविरिव शुभां ध्वाङ्क्षतो धारणेयि ।
यद्वा सोमं ग्रहणसमये राहुतो रोहिणीश-
ज्योत्स्नेवासौ वियति वितमा भूमिजा भाति भव्या ॥ १३८ ॥
या वै पूर्वं कनकभवने चारुशीलामुखाभि-
र्गायन्तीभिर्मधुरमधुरं बोध्यते स्म प्रभाते ।
सैषा सम्प्रत्यतिकरवटाक्रूररक्षोवधूभि-
र्धूम्राक्षीभिर्मरणशरणाभीषिता बुध्यते हा ॥ १३९ ॥
क्रूरब्रह्मन् गरलसरसि प्राक्षिपो मानसीयां
हंसीं हा हा हरसि हरिभूः सोमवल्लीं विषोदम् ।
नेतुं काङ्क्षस्यथ सुरगवीं नारकाणां तरूणां
घोरारण्यं न खलु चतुरश्चातुरास्यं दधानः ॥ १४० ॥
मा भैषीस्त्वं विगतसुकृताद्भग्नचारित्र्यशीला-
ल्लङ्काभर्तुर्भुवनजननस्थाननाशादिशक्ते ।
छायां स्प्रष्टुं प्रभवति न वै विश्रवोवंशवह्नि-
र्दूराद्देव्याः कुमतिरिव ना नास्तिको ब्रह्मविद्याम् ॥ १४१ ॥
मा त्याक्षीस्त्वं जनकसुकृतप्राप्तदेहं धराजे
इक्ष्वाकूणां कुलकुलमणिं रामसर्वस्वभूतम् ।
दोष्णोश्शक्तेर्निकषमिव मे यत्नतस्त्रातपूर्वं
त्रय्या ज्ञानं तिसृभिरिव मन्मातृभिः सदृशाभिः ॥ १४२ ॥

http://www.jagadgururambhadracharya.com

मा कार्षीस्त्वं विरहदहने भस्मशेषं शरीरं
मत्सर्वस्वं धरणिरमणीसन्मणिं शीलशोभम् ।
यत्कौसल्यानलिननयने पुत्तली साम्यमेत्य
त्रातं पूर्वं सुकृतममलं सम्भृतं मैथिलीनाम् ॥ १४३ ॥
मा हार्षीस्त्वं विबुधललनालोभनीयं सुधैर्यं
शौर्यैश्वर्यं सुभटतिलकोद्वेजकं विघ्नवीर्यम् ।
येनाकारि त्रिपुरमथनं कार्मुकं क्रूरकर्म
क्रीडाव्याजाद्धतबलमदं पक्षिराजा यथाहिः ॥ १४४ ॥
मा धाक्षीस्त्वं दशमुखकुलं क्रोधकालानलोद्य-
ज्ज्वालामालाकुलितमहसा विश्वसंहारकेण ।
पौलस्त्यासृग्रसिकरसना मामका देवि बाणा
जाग्रत्तर्षाः कुवलयदृशा नो निराशाः क्रियन्ताम् ॥ १४५ ॥
मा द्राक्षीस्त्वं मयि सुवदने स्वां प्रति प्रीतिशून्यं
लब्धोपेक्षं वितरमनसं हार्दहीनं कुभावम् ।
चातुर्मास्यप्रणिहितमना नैव जानन् प्रवृत्तिं
भग्नोद्योगोऽहमकपिबलो मानवः कालवश्यः ॥ १४६ ॥
मा स्राक्षीस्त्वं स्रजमविरलां कञ्जदृग्भ्यां द्रगिष्टे
सूष्माश्रूणां विमदितमहामञ्जुमुक्ताशराणाम् ।
मत्कोदण्डोच्छलितविशिखैर्वृक्णमूर्घ्नां रिपूणां
माला शीघ्रं नयनसरसां स्रक्ष्यते स्त्रीभिरुच्चैः ॥ १४७ ॥
मा हासीस्त्वं हरिणनयने जीविताशां कदाचि-
ज्जीवन् जीवो जगति शतशो भद्रमूलानि पश्येत् ।
क्षिप्रं पङ्केरुहकररुहैर्देवि ते वक्त्रचन्द्रं
स्पर्शं स्पर्शं ननु परिमृजन्मण्डयिष्येऽश्रविन्दून् ॥ १४८ ॥
मा रासीस्त्वं कलितकलुषं दूषणं दूषणारौ
त्वद्धृत्यर्थं निहितहृदये साधने जागरूके ।
रोदं रोदं रुदितनयनाम्भोरुहे त्यक्तनिद्रे
कोके कोकीरहित इव भो नक्तमुद्विग्नचित्ते ॥ १४९ ॥
मा यासीस्त्वं नृपतितनये जीवितेषान्निराशां
मत्तोऽमत्तात्कपिपतिविशोद्योगसैन्यप्रयाणात् ।



http://www.jagadgururambhadracharya.com

संवृश्च्याहं रविकरसमैर्मार्गणैः पङ्क्तिमौले-
र्मूर्ध्नो मोघीकृतखलबलस्त्वानयेयं मुहूर्तात् ॥ १५० ॥

यस्मादह्नः कपटयतिना चोरिताया भवत्या
विश्लिष्टोऽहं मधुरमणितो विप्रयुक्तः फणीव ।
तस्मादह्नो जगदिदमहो काननं मे विभाति
नो तत्तत्त्वाद्यदिह कसुखं चाननं नो त्वदीयम् ॥ १५१ ॥

स्निग्धापाङ्गं झषयुगलसत्तारकं कज्जलश्री-
स्मेराम्भोजोपममभिमिलत्कुण्डलं कुन्तलाढ्यम् ।
बन्धूकत्विड्विहसदधरं किञ्चिदुद्यत्कपोलं
सीतावक्त्रं विजितविधुकं कं क्व चापश्यतो मे ॥ १५२ ॥

नाहो भुञ्जे नहि निशि शये नो प्रभाते प्रबुद्धे
नाहं जृम्भे न च पुनरहं निःश्वसिम्याप्तशान्तिः ।
नैवोन्मीले नलिननयने नैव नेत्रे निमीले
शून्योऽहं स्वं त्वदधरसुधापानहीनो हिनस्मि ॥ १५३ ॥

कुञ्जेऽपि त्वं त्वमसि विपिने त्वं गिरौ त्वं च दर्या-
माकाशे त्वं त्वमसि धरणौ त्वं जले त्वं स्थले च ।
त्वं मत्पार्श्वे त्वमसि हृदये त्वं च पृष्ठे त्वमग्रे
सर्वं सीतामयमिदमहो कीदृशोऽद्वैतवादः ॥ १५४ ॥

स्वप्नेऽपि त्वं त्वमसि शयने जागरे त्वं जगत्यां
त्वं त्वं वायौ त्वमसि दहने त्वं रसे रस्यरूपे ।
त्वं खे नित्यं त्वमसि मनसि त्वं मतौ चात्मनि त्वं
चित्तेऽपि त्वं त्वमसि प्रकृतौ को ह्ययं ब्रह्मवादः ॥ १५५ ॥

मन्दं मन्दं मलयनिलये वाति वाते विभाते
निःश्वासस्ते नसि ननु मया साधु जेघ्रीयमाणः ।
प्रातर्भास्वत्किरणकलितं पल्लवं ताम्रमाम्रं
सीते प्रीतस्त्वदधरधिया पातुमुच्चैः प्रधावे ॥ १५६ ॥

प्रातः सीतेऽरुणिमनि रवेरङ्घ्रिहस्ताधराणां
मध्याह्नेऽर्केऽप्यतिशयितसौदामिनीज्योतिषस्ते ।
प्रोद्यद्राकारजनिपि मुखं भावयन् पश्चिमायां
ध्यायन् सन्ध्या त्रितयमनघस्त्वन्मयं ह्याचरामि ॥ १५७ ॥

http://www.jagadgururambhadracharya.com

पद्मे पद्मे सरसि शरदा हास्यमाने समाने
पादे सिंहे कटितटमहं ह्यूरुयुग्मं कदल्याम् ।
विल्वे वक्षोरुहमहमुरःसत्तडागे सुकीरे
नासां चन्द्रे वदनमनघे त्वां विचिन्वे प्रकृत्याम् ॥ १५८ ॥
कोक्यां प्रीतिं हरिणदयितायां दृशौ कीरपत्न्यां
नासां वाचं श्रवणमधुरां मञ्जुलां कोकिलायाम् ।
भृङ्ग्यां केशान् भुजगवनितायां च सीमन्तवेशं
सर्वं देव्याः प्रकृतिनिहिते वस्तुनि व्याचिनोमि ॥ १५९ ॥
हा हा सीते जनकतनये हा किशोरि प्रिये मे
हा हा दद्भिर्विजितचपले हा महीमञ्जुपुत्रि ।
हा कौसल्याप्रियतमवधूर्हा शुभे हा सुशीले
हा हा कस्मान्न भवसि पथि प्रार्थिता राघवाक्ष्णोः ॥ १६० ॥
कार्ये दासीयस इतरथा गेहिनो गेहिनी मे
मन्त्रानेहस्यमलमतिमन्मन्त्रिणी मन्त्रविज्ञा ।
स्नेहोत्सर्गे त्वमथ जननी सम्मिता सम्मितस्वा
धर्मे पत्नी मयि जनकजे कं कमाकारमाप्थाः ॥ १६१ ॥
आखेटान्मां किल परिवृतं स्वेदसङ्क्लेदितास्यं
श्रान्त्या शुष्काधरकिसलयं बन्धनिर्मुक्तजूटम् ।
दृष्ट्वा स्पृष्ट्वा कमलकरजैरञ्चलं वीजयन्ती
धत्से स्माद्धा श्रमविरहितं हाद्य कास्ति स्थितिर्मे ॥ १६२ ॥
या मां व्यस्तं मुनिवरसभास्वाह्निके स्वातिवेलं
सोढुं नास्म प्रभवसि रुषा सानुजं लम्भयन्ती ।
सैवेदानीमशनरहितस्याशिनः पञ्चमं मे
हा हा किन्नो गृहिणि दयसे दैवमत्र प्रतीपम् ॥ १६३ ॥
दूरं याते वनमवरजावल्लभेऽधीज्यचापे
प्रेम्णा हर्तुं तृणफलदलं कन्दमूलं कनिष्ठे ।
विघ्ना कालात्ययनिगमतो देवरे वत्सलत्वा-
न्मां हिन्वाना किमु न दयसे साम्प्रतं लक्ष्मणस्य ॥ १६४ ॥
रक्षायां ते सुतमिव निजं लक्ष्मणं लब्धलक्ष्यो
व्यापार्याहं कनककुरगं हन्तुकामः प्रयातः ।

http://www.jagadgururambhadracharya.com

त्वं चाप्येनं मदनुसरणं चञ्चलद्बाष्पधारा-
र्नूनं नारी भवति सविपत्प्राणनाथेऽप्रतीता ॥ १६५ ॥
यद्यप्येषो कुरुतपरितस्त्वां स्वचापेन रेखा-
माचार्यो गामिव निगमगां प्रक्रियां शब्दतो वै ।
तामुल्लङ्घ्योन्मथितमनसा रावणेनाहृता त्वं
शोचन्त्येवं नियतिमबला लङ्घितश्रौतमार्गा ॥ १६६ ॥
पित्रादेशादनुजदयितासेवितोऽहं सुखेना-
वात्सं वर्षाण्यथ च दशभिश्चारु चत्वार्यरण्यम् ।
मध्ये माद्यन्मनसि हरिणे लोभ आविष्कृतस्ते
सीते सीदत्यवशमबला वल्लभे भूर्यपेक्षा ॥ १६७ ॥
शून्ये शून्यां विजनविपिने प्राणभृद्देवराभ्यां
हीनां धारामिव सुहविषां मन्त्रशास्त्रस्वराभ्याम् ।
रक्षोऽहार्षीदहह दयितां छद्मसन्न्यासवेषं
नारी नालं स्वमवितुमसौ रक्ष्यपेक्षा हि योषा ॥ १६८ ॥
नालङ्घिष्यो यदि सुवदने लक्ष्मणेष्वासरेखां
नैवायास्यस्तदरिकुकरे रोहिणी वाथ राहोः ।
सर्वं चैतद्घ्यघटितमहो देवि सञ्ज्ञाघटीति
स्वप्नाकारं क्षणमिव भवे चित्रकर्मा विधाता ॥ १६९ ॥
मा शङ्किष्ठा हरिणनयने मां प्रति त्वं तथापि
त्वत्प्रेमेवामृतनवरसो जीवयन्मां चकास्ति ।
आनेष्यामि क्षपणचणकैस्त्वां शरै राक्षसानां
नष्टां वेदश्रुतिमिव हयग्रीव उद्ग्रीव रामः ॥ १७० ॥
पश्चात्तापज्वलन उदितो दुष्प्रमादेध्मजन्मा-
निष्टाशङ्काविपुलविलसज्ज्वालकः शोकसर्पिः ।
तीव्रोच्छ्वासप्रबलमरुता मित्रकेणेधमानो
धैर्यालातं दहति खलु ते देवरं देवि नित्यम् ॥ १७१ ॥
तं धीमन्तं समभिभवतो नो जिघत्सापिपासे
द्राङ्निद्रापि स्पृशति नहि तं त्वत्स्वसुश्चेव भीता ।
पीत्वा कोष्णां सरसिजदृशोर्निर्गलद्बाष्पधारां
भ्राता नक्तं नयति नितरां त्वद्दिदृक्षैकचक्षुः ॥ १७२ ॥

योऽसौ नित्यं सुखमधिवसंस्तावकस्नेहशालां
सर्वं लोकं तृणमिव जहज्जीवति स्मात्तमोदः ।
सैवेदानीं कुटिलविधिना त्वद्वियुक्तो मुमूर्षु-
र्वत्सो जीवेत् किमुत जननीमन्तरेणाल्पसत्त्वः ॥ १७३ ॥
मा मा मेति प्रलपति सदा बाष्पसङ्क्लिन्नकण्ठो
दूरीभूतो वन इव रुदन् वत्सको वत्सलायाः ।
धेनोर्धुन्वन् धनुरतितरां खिद्यमानोऽनुजो मे
रात्रौ जाग्रज्जपति जटिलो जानकीजानिमार्तः ॥ १७४ ॥
घोरारण्ये तव विरहिणे कोऽपि सध्र्यङ् सखा मे
प्रत्तः प्रह्वो वनजजनिना बान्धवो बन्धुनिष्ठः ।
सोऽपि व्रीडाविकलवदनो रक्षणे न क्षमस्ते
धर्तुं नालं स्वमिव शिशुको जातदूरो जनन्याः ॥ १७५ ॥
एकोऽहं त्वद्विरहविधुरो जीवितात्स्वान्निराशः
शोकाम्भोधौ विरहिततरिस्तर्तुकामो विमग्नः ।
भूयस्सीते तव सुतमिमं वीक्ष्यमाणो विपन्नं
नापद्येशं क्षणमपि सुखं हा विधे किं विदध्याम् ॥ १७६ ॥
संस्तभ्यात्मानमहमबलो यावदिच्छामि तर्तुं
त्वच्छोकाब्धिं क्षणमपि शुभे लब्धधैर्यप्लवोऽहम् ।
तावज्झञ्झासदृगनुपमा लक्ष्मणीयाश्रुधारा
मोघीकृत्य प्रयतितमिमं मज्जयन्ती दृणाति ॥ १७७ ॥
यस्मादह्नोऽवनिसुतनये त्वं हृता रावणेना-
प्यह्नस्तस्मान्नहि पदमसौ सेवते दक्षिणं मे ।
स्मारं स्मारं सति तव कृतां सव्यपादस्य सेवां
रोदं रोदं नयनसलिलैः क्षालयत्यङ्घ्रियुग्मम् ॥ १७८ ॥
हा हा मातर्जगदगजनिप्रार्थिताभीष्टदेहे
हा कौसल्यासुखकरवधूर्हा सुमित्रास्नुषे हा ।
हा मद्देहावनितलभवद्भव्यवात्सल्यवर्षे
मामप्येष व्यथयतितमां वाचमेवं ब्रुवाणः ॥ १७९ ॥
एकां त्यक्त्वा क्षणभवरुषा भग्नकर्तव्यमार्गो
यातो देवीं गहनविपिने मूढबुद्धिः किमर्थम् ।

http://www.jagadgururambhadracharya.com

एवं जल्पन् स्वमथ हृदयं ताडयन् मुष्टिनासौ
प्राणान्धत्ते कथमपि मया वार्यमाणस्सुतस्ते ॥ १८० ॥
धिङ्मां मोघाचरणमबलं धन्विधुर्यं सधैर्यं
शूरं मन्यं समरसमरश्लाघिनं राघवाङ्कम् ।
दोष्णोश्छायां किल परिगतां स्वानुगां यो न पत्नीं
पातुं शत्रोरशकदभितः कौमिदीं स्वामिवेन्दुम् ॥ १८१ ॥
किं मे कार्यं विपुलविभवैः कोसलैः किं सकोषैः
किं मे भूयः प्रियपरिजनैः सानुरागैश्च पौरैः ।
किं मे मित्रैः सचिवनिकरैः किं च राज्येन किं मे
नात्मासि त्वं यदिह सुभगे सर्वमेवात्र शून्यम् ॥ १८२ ॥
शीतांशुर्वै वमति गरलं स्वर्णदी पूतिगन्धा
वैरायन्ते सकलसुहृदो भाययत्येष भानुः ।
चिन्तां चिन्तामणिरुपदधत्पारिजातोऽकजातो
विश्वं विश्वं विषमयमहो त्वद्वियोगे प्रतीपम् ॥ १८३ ॥
सन्तीदानीं यदपि बहुधाऽपाततः साधका मे
सौख्यस्यार्था जगति सुलभाश्चित्ततुष्टिप्रयत्नाः ।
राज्यं प्राज्यं प्रकृतिरबलाः सार्वभौमं च भोज्य
सीताभावे सकलमपि मे दुःखदुःखाय नूनम् ॥ १८४ ॥
मय्यायाते श्रमकणभरोद्भासि भाले कपाले
स्पर्शं स्पर्शं सरसिजशयं साध्वि मार्क्षि स्म सद्यः ।
तानेवाहं गृहिणिविरहे साम्प्रतं स्वेदविन्दून्
पीत्वा पीत्वा निशि निशि शये मारयित्वा पिपासाम् ॥ १८५ ॥
मातेव त्वं यमथ विपिने कन्दमूलं फलं वा
लालं लालं चतुरहनि भो भोजयन्ती स्म भाति ।
सैवेदानीं तव विरहितो वीरपत्नि प्रभुङ्क्ते
भक्त्या भक्तं कथमपि रुदन् पञ्चमं पञ्चमेऽह्नि ॥ १८६ ॥
त्वत्सान्निध्ये सरसमरसं पक्वमेवाप्यपक्वं
स्वादुङ्कारं सकलमनघे ह्यादमप्रातिकूल्ये ।
हा हा सम्प्रत्यमृतसदृशं लक्ष्मणेनाहृतं तद्-
भुञ्जे दूरस्त्वदहममनाः कालकूटायमानम् ॥ १८७ ॥

यद्याप्येते कुशलकपयो वायुपुत्रप्रधान
गापं गापं तव गुणगणान्लक्ष्मणेनानुवेलम् ।
नानाख्यानै रमयितुमलं राममार्या यतन्ते
आत्माभावे सुखमथ कथं शून्यचेष्टे शरीरे ॥ १८८ ॥
चातुर्यं ते प्रकृतिचतुरे वेद वैदेहि वेद्यं
मञ्जीवातुं कटकयुगलं कुण्डले कर्णशोभे ।
केयूरे त्वं कपिषु रिपुणा प्राहिणोर्नीयमाना
तैरेवाहं श्वसिमि दयिते यामिकै रक्ष्यमाणः ॥ १८९ ॥
सुग्रीवो मामकृत ऋणिनं तानि ते दर्शयित्वा
यत्नात्त्रातान्युदजवदने भूषणानि प्रियायाः ।
श्लेषं श्लेषं रहसि च हृदा जीवितालम्बितानि
प्राणान्धर्तुं प्रभवति जनो न्यासविष्टप्रतिष्ठम् ॥ १९० ॥
दृष्ट्वा मर्कान् कलितकपटान् मां प्रपन्नान्विधित्सु-
र्ज्ञात्वा भूयः कपटमनिशं मद्विरोधिस्वभावम् ।
क्षिप्त्वा प्रेमाकृतिपटमहो तं निरस्यः कपिभ्यः
सत्सिद्धान्तं प्रकटितवती त्वं पटक्षेपकेल्या ॥ १९१ ॥
केयूरे ते विलसितभुजे कङ्कणे सुप्रकोष्ठे
एते व्रीडान्मकरमिथुने कुण्डले कर्णभूषे ।
नाहं जाने त्वदवयवतो यद्वियासून्यमूनि
त्रातुं मन्ये विरहिगृहिणं प्रेषितानि त्वयैव ॥ १९२ ॥
हत्वा रक्षोनिकरमिषुभिर्योगिनीस्तर्पयित्वा
कोष्णै रक्तैर्निहतपतिका राक्षसी रोदयित्वा ।
लङ्कां लङ्कां विगतकुणपां भग्नशङ्कां विधास्य-
न्नेभिः क्षिप्रं विजयविलसच्छ्रीमुखीं मण्डयिष्ये ॥ १९३ ॥
मा मा रोदी रघुवरकुमुत्कौमुदी कावनागा
मा मा त्रासीः स्वमथ विपदा योजितं दूरबन्धुम् ।
मन्नाराचैर्निहतशिरसः पङ्क्तिमौलेर्गृहिण्यः
क्षिप्रं रोत्स्यन्त्यविरलपयोधारया धर्षितास्याः ॥ १९४ ॥
नासौ कालः कुमुदविशदस्मेरवक्त्रे विदूरो
यस्मिन् रक्षोविपिनवसते कूपवासैः कृषायाः ।

आगत्याहं सहकपिगणो भग्नपौलस्त्यदर्पः
पाता प्रीत्या त्वदधरसुधां संहरिष्यञ्जटां ते ॥ १९५ ॥

शङ्का कार्या न खलु कदने शात्रवाणां भवत्या
रक्षोऽरण्यज्वलनविशिखो दीप्यते देवरस्ते ।
क्रोधज्वालाविलुलितदृशा शोषयिष्यन्समुद्रं
कर्ता विश्वं विगतकुणपं लक्ष्मणोऽयं क्षणार्धात् ॥ १९६ ॥

त्यक्त्वा यातो यदथ भवतीवाग्धतो मामनागा
सोऽस्माच्छोचत्यनिशमनघो मागधेयोऽश्रुकण्ठः ।
त्वत्पीडायाः प्रतिकृतिमसौ कर्तुकामः करालः
कालः कश्चित्समभवदहो दुर्निवारस्त्रिदेव्या ॥ १९७ ॥

योऽहं राजच्छ्रमजललसद्गण्डभालो भवत्या
दृष्टः क्लान्तः कमलनयने त्वत्पितुर्वाटिकायाम् ।
सोऽहं योत्स्ये कथमरिभटैश्चेति शङ्कां जहीथाः
कालो व्यक्तिं कुलिशकुसुमोद्दामधर्मैर्युनक्ति ॥ १९८ ॥

मा मा शोकं सुमुखि कुरुतात् त्वत्प्रयाणप्रकर्णे
शीघ्रं सैन्यं किल घटयितास्म्यृक्षकीशेश्वराणाम् ।
बध्वा सेतुं लवणजलधौ भूरुहैः शैलशृङ्गै-
र्लङ्कामीक्षे मरणशरणां क्रुद्धकालो यथाहम् ॥ १९९ ॥

सुग्रीवो मे सुहृदनलसो जागरूकस्त्वदर्थं
शोधार्थी ते दिशि दिशि कपीन्प्रेषयत्युग्रवीर्यान् ।
प्राप्स्यामस्त्वां श्रुतिमिव हयग्रीवधर्माण उच्चै-
र्बाहुर्दक्षः स्फुरति निगदन् मङ्गलं माङ्गलिक्यः ॥ २०० ॥

मद्बाणानां प्रलयजलदौपम्यभाजां शितानां
रक्षोभूमौ खरतररुषा वर्षतां भीषणानाम् ।
अग्रे तिष्ठेत्किमुत हरिजित्कुम्भकर्णः कथं वा
पौलस्त्यः किं क्षणमथ भवेन्नारिचौरो दुरात्मा ॥ २०१ ॥

वर्षोत्कर्षे गतवति शरच्चन्द्रशुभ्रे निरभ्रे
व्योम्नि क्रीडन्मलयजमिलन्मारुते मारुतिर्मे ।
शीघ्रं यास्यत्यजचरणितैजत्समुद्रः समुद्रः
सन्देशं ते पुनरुपहरन् रक्षउद्यानकेतुः ॥ २०२ ॥



http://www.jagadgururamabhadracharya.com

यावन्नायात्यधिकविषयो मां सुकण्ठः सुसैन्यो
दैन्यं देव्याः किल परिमृजन्मेघलेखां खभूर्वा ।
तावत्स्थातास्यहह विवशा रावणेनातिमात्रं
क्लिष्टा सीदस्यवनितनये राहुणा रोहिणीव ॥ २०३ ॥
यावन्नायान्त्यमरमहसा मण्डिता वानरेन्द्रा
लङ्कां क्रान्त्वा पुरमिव तनुं प्राणशून्यां च याम्याः ।
तावत्सीते दशमुखमुखात् कर्णशङ्कूपमास्त्वं
वाचः सोढुं प्रभव भगवान्काल एवात्र मानम् ॥ २०४ ॥
मा मा प्राणांस्त्यज जनकजे कोसलापुण्यलब्धान्
स्निग्धान् रामप्रणयनिलयान् विप्रयुक्ता मया त्वम् ।
प्रातःकल्पां व्यसनरजनीं क्रूरकष्टप्रदात्रीं
नीत्वा भूयस्समनुभवितास्यञ्जनासूनुसूर्यम् ॥ २०५ ॥
न्यस्यन्नैशं निशिचरतमस्तोममारान्निरस्यन्
नैराश्यं सत्सरसिजनुषां मोदयन्नक्षिभृङ्गान् ।
चेतः कोकान्कुशलकृतिनो ह्लादयन् भक्तिपद्मां
युञ्जन्हर्षैरुदयति सपद्यञ्जनादित्यभानुः ॥ २०६ ॥
रक्षश्चक्रं विरहसलिलैर्योजयन्सच्चकोरान्
रामानन्दामुपमसुरसं पाययन् पालितार्यः ।
तिष्ठन्देवामलमृगमनस्येष पूर्णो यशोभि-
र्भिन्दञ्शोकं झटिति विलसत्यञ्जनासिन्धुचन्द्रः ॥ २०७ ॥
मन्यूज्झञ्झासमुदितजवो यातुधानेध्मदाही
श्रीरामेति प्रकटमहिमस्वाहया तर्प्यमाणः ।
तेजोज्वालाशतशतलसच्चण्डतापः प्रतापी
शीघ्रं लङ्कां दहति दहनो ह्यञ्जनारण्युपात्तः ॥ २०८ ॥
रक्षोयोषाजठरजपयोजातहेमन्तरात्रि-
रुद्यद्बालारुणरविसहस्राभवक्त्रैकजन्मा ।
श्रीशर्वाणीद्रुहिणगृहिणीभर्तृधैर्यप्रहन्त्री
शीघ्रं श्राव्या जगदघहरी हुङ्कृतिर्वायुसूनोः ॥ २०९ ॥
प्रेजच्छेषा व्यथितकमठा वृक्णवाराहधैर्या
शौर्योद्दामप्रकटनिकषीभूतवेगाघहन्त्री ।



http://www.jagadgururambhadracharya.com

पौलस्त्याहङ्कृतिजलनिधिस्वौर्वसत्वा चलार्का
श्रोतव्या ते झटिति शुभगे हुङ्कृतिश्चाञ्जनेयी ॥ २१० ॥
शोभाव्रीडत्कनककुधरो लीलया लङ्घिताब्धि-
र्लङ्कातङ्कप्रजननविधौ मूर्तिमान् धूमकेतुः ।
दोर्दण्डोद्यच्छतपविरवोद्विह्वलत्कालकालो
द्रष्टव्यस्ते तरुणतनयः शोकहारी हनूमान् ॥ २११ ॥
मत्तोऽमत्तो बलजलनिधिर्लब्धमुद्रः समुद्रः
साड्गुण्यानां निधिरिव सतां मूर्तिमान् संयमोऽसौ ।
लङ्घित्वाब्धिं वरुणनिलयं धर्षिताशेषरक्षा
हर्ता शोकं सति तव हरिर्भक्तपापानिवाहम् ॥ २१२ ॥
दृष्ट्वा बालारुणरविशतोद्दामदंष्ट्राकराल-
ज्वालामालाकुलितवदनं कोटिकालैककालम् ।
लङ्कारङ्कीकरणचणकं कान्दिशिक्यः क्षपाट्यः
सम्पत्स्यन्ते पवनतनयं सिंहमित्येव शून्यः ॥ २१३ ॥
हुङ्कारेण प्रमथितमहाकालधैर्यावलेपं
देहोच्छ्रायक्षपितसुरभृच्छैलगर्वं गवीशम् ।
त्वच्छोकाग्निप्रहुतसुभटं दग्धलङ्कं विशङ्कं
शेक्षस्यश्रैः गिरिवरमलं मेघलेखेव सूनुम् ॥ २१४ ॥
त्वां क्लिश्नाति प्रगुणधनया स्वर्णपुर्या ययासौ
लेखाधीशक्षपणनिपुणो नीचनीचाधिराजः ।
सैव क्षिप्रं मम हनुमता भस्मभूता भवित्री
लङ्का रङ्का विगतविभवा फाल्गुने होलिकेव ॥ २१५ ॥
येनासभ्यो जनकतनयां लोभयन्लूनलाभः
क्षुभ्नाति त्वां मरणशरणो वासवे बद्धवैरः ।
साम्राज्येन त्विदमनलिजक्रोधवैश्वानरेण
प्लुष्टं द्रक्षस्यवनितनुजे शुष्कशष्पं यथा त्वम् ॥ २१६ ॥
यस्मिन् सीते विजनविपिनेऽशोकनाम्नि प्रलूना-
वासन्तीव व्रततिररिणा शोचसि त्वं वसन्ती ।
शीघ्रं तद्वै प्रकुपितहृदोद्धृत्य वातात्मजेन
ध्वंसं ध्वंसं भवभयमिवोत्क्षेप्स्यते शोकसिन्धौ ॥ २१७ ॥

या राक्षस्यो विकटवदनास्त्वां विषण्णां विरूपा-
स्तर्जं तर्जं वचनकुलिशैर्मर्मतोदं तुदन्ति ।
तासां केशग्रहणविफलत्सर्वचेष्टाक्रियाणां
हर्ता प्राणान् हरिरिव हरिर्हर्षहन्ता हनूमान् ॥ २१८ ॥
किं स्याच्छक्तिर्विपुलजलधिक्रामणेऽष्टाङ्गुलस्य
मर्कस्यारिप्रशमनविधौ चेति शङ्का न कार्या ।
स्वल्पाकारोऽप्यतिमृदुकरोऽनूरुसूतो हि सूर्यो
व्योमक्रामन् विधमतितमः सिद्धसत्त्वा हि सन्तः ॥ २१९ ॥
नैव ब्रह्मा नहि मधुरिपुर्नैव रुद्रो न चेन्द्रो
नार्को नेन्दुर्नहि किल यमो नैव कालो न सर्पाः ।
नैव प्रेता नहि निशिचरा गुह्यका नैव यक्षाः
स्थातुं शक्ता युधि हनुमतः किं वराको वराकः ॥ २२० ॥
चञ्चत्पुच्छोन्मथितबलभिच्चापसौन्दर्यदर्पं
बालोत्प्लुत्यार्पितरविशुनासीरवैधुन्तुदाकम् ।
तं कं कञ्चित् समररसिकं काञ्चनाद्रिस्वरूपं
कालालातज्वलनसदृशं संयुगे कः सहेत ॥ २२१ ॥
मा गा गाधिप्रभवविभवच्छात्रभार्येऽकमार्ये
आयानेमे विरहमनसः संविलम्बं विभाव्य ।
विज्ञाते ते ननु हनुमतः साध्व्युदन्ते दुरन्ते
दुर्जेयैस्तैः कपिभिरनघैः शीघ्रमायामि लङ्काम् ॥ २२२ ॥
धैर्यं धर्तुं प्रभवभविके साध्वि सर्वंसहाजे
त्वत्पीडाविद्धिरहरजनी मा चिरान्नाशमेते ।
सामीर्यर्कोद्गमनकिरणध्वस्तनैराश्यताम्यां
साम्यावस्थामिव सुकृतिनः पश्य वैभातवेलाम् ॥ २२३ ॥
त्वत्सन्तापाद्विजनवसुधादेवशापात्स्वपापात्
पश्चात्तापान्मम समुदिते नाग्निनात्युल्बणेन ।
दग्ध्वा लङ्कां पुरटरचितां जातरूपाचलाभो
भास्वद्वंशोज्ज्वयननयनस्त्वां समेताञ्जनेयः ॥ २२४ ॥
त्वामायातं प्रशमितशुचं मुद्रिकादानतो मे
सम्मज्जन्त्या विरहजलधौ पूतपोतायमानम् ।

http://www.jagadgururambhadracharya.com

मा भेतव्यं किल कपिपतिं वीक्ष्य भामे भवत्या
सिंही सैंहात्किमथ बिभियात्स्वप्रसूतात्सुताद्वोः ॥ २२५ ॥
यावन्नायान्त्यपि कपिवराः कामरूपा दिशाभ्यो
नानाकारा गिरितरुधरा भानुपुत्रप्रदिष्टाः ।
तावद्विद्या दशमुखपुरि स्वस्थितिं भूमिपुत्रि
प्रत्यूषे किं प्रभवति रवौ जागरूके तमिस्रा ॥ २२६ ॥
बद्धो दन्वत्यगणिततरुप्रांशुशैलैश्च सेतुं
ज्योतिर्लिङ्गं गिरिशमचलं सेतुबन्धे विधाय ।
संसाराब्धौ स्व इव भजने प्रत्ययं सम्प्रतीत-
स्त्वामानेष्याम्यति सपदि गां दान्तदैत्यो यथाहम् ॥ २२७ ॥
नो विश्लेष्या दिवसमणितस्तस्य कान्तिर्यथैव
ज्योत्स्ना चन्द्रं क्षणमपि यथा जातु नैवोज्झहन्ति ।
नाग्नेरर्चिः कथमपि यथा शक्यते विप्रयोक्तुं
तद्वत्सीते त्वमसि नहि मद्विप्रयोज्या कथञ्चित् ॥ २२८ ॥
नित्याभिन्ना त्वमसि हि मया राघवेणावनेयि
ख्याता वेदे विमलपयसे वाथ वीचिर्विषण्णे ।
लीलैवेषा जगति विहिता विप्रलम्भं रसेशं
लोकेऽलोके हरणमिषतो लम्भयन्तीव वक्तुम् ॥ २२९ ॥
नाहं त्वत्तः क्षणमपि भवे चैव भूतः पृथक्त्वे
मत्तस्त्वं च क्षणमपि पृथङ्नैव भूता कथञ्चित् ।
त्वय्येवाहं भवति च मयि प्राप्तसंवासधामा
हा हा धातः घटत इह नौ कीदृगध्यासवादः ॥ २३० ॥
सीतानन्यो विरहविकलोऽप्येष तिष्ठामि रामो
रामानन्या भवसि सुभगे दूरनीतापि सीता ।
सीता रामो रमणरसिका सर्वथैवास्यभिन्ना
रामस्सीता रमणिरसिको लौकिकश्चात्र भेदः ॥ २३१ ॥
एकं ब्रह्माहमथ विमलं भामि भामेऽद्वितीयं
द्वैधा दृश्ये रसिकरुचये भक्तभावानुसारम् ।
पुंस्त्वं बिभ्रद्दशरथगृहे चाध्ययोध्यं कुमारो
नारीरूपं जनकनगरे कौ च सीताकुमारी ॥ २३२ ॥

भेदाभेदाविह विलसतश्चावयोर्भावभाव्यौ
जानानो नौ विमलमतिमांश्चैकबुद्ध्या भजेत ।
रामाख्यो योऽवधपुरगतः सच्चिदानन्दरूपः
सोऽयं सीता जनकनगरे संविदानन्दरूपा ॥ २३३ ॥
दम्पत्योर्नौ विलसतितमां रूपतश्चात्रभेदो
भावो भामे भुवनभवनौ विद्युदब्दोपमानौ ।
सीतारामाविति समुदितौ द्वन्द्वरीत्या नृलोके
सीतारामो व्यधिकरणतस्तत्पुमान्वा समानः ॥ २३४ ॥
यत्सौन्दर्योपहितममलं ब्रह्म संवित्स्वरूपं
तत्सीताख्यं सुगुणनिलयं नित्यबीजं जगत्याः ।
यन्माधुर्योपहितमतुलं व्यापकं ब्रह्म भूय-
स्तद्रामाख्यं सगुणमगुणं सच्चिदानन्दमेकम् ॥ २३५ ॥
लीलासिद्ध्यै प्रकटितमहो गौरमव्याकृतं यत्
तत्कार्याख्यं त्वमसि विशदं ब्रह्म वात्सल्यधाम ।
यद्वै व्योम्नि प्रथितपरमे कारणं ब्रह्म नित्यं
तद्रामाख्यं विरजमनयोरैक्यमाहुर्विशिष्टम् ॥ २३६ ॥
द्वे अप्यावां प्रकृतिपुरुषाभ्यां विशिष्टे वदन्ति
द्वे अप्येते किल चिदचिती प्राहुरस्मत्प्रकारे ।
तद्वैशिष्ट्यात्सुतनुतनुमद्योगतो वै विशिष्टा-
द्वैतं प्राहुर्विमलमतयो ब्रह्मणो दर्शने नौ ॥ २३७ ॥
ये त्वामाहुः कुटिलमतयो जीवकोटिं प्रविष्टां
ते वै क्रूरा निरयनिरयं कल्पकोट्यै व्रजन्ति ।
ये त्वां मत्तो ननु नहि पृथग्जानते ते हि रामा-
नन्दं प्राप्तः विरजवपुषो मत्समीपं प्रयान्ति ॥ २३८ ॥
नाहं त्वत्तः क्षणमपि पृथग्वापि वारीव वीचे-
र्मत्तस्त्वं न त्वमसि तरलं वारितो यद्वदार्ये ।
अन्योऽन्यस्मात्पृथगिव च नौ या व्यधात् सा तु लीला
गेयः सीताहरणमिषतो भृङ्गदूते वियोगः ॥ २३९ ॥
मायासीतामकृत भवती मुक्तये पङ्क्तिमौले-
राविष्यैनां मयि विरहिणीमभ्यनैषीः प्रिये तत् ।

तेन प्रेमा त्वयि प्रकटितो हिन्वता मे मनोऽलिं
गोप्यं जानन्त्विति हि सुधियो भृङ्गदूतस्य सारम् ॥ २४० ॥
साहाय्यार्थं मम निजपतेराविरासीर्महीतो
मूढो लोको तव च महिमा ह्यानतस्त्वां न सेहे ।
घोरारण्ये ननु सह मया प्रेषिता मत्समात्रा
दत्तो वासो हुतभुजि मया लक्ष्यचक्षुर्हि लोकः ॥ २४१ ॥
धिक्संसारं विगतकरुणं निष्कृपं सत्कृपाणं
खट्वारूढं कलुषितमतिं स्वार्थचक्षुष्कमज्ञम् ।
यत्रागत्य प्रणतजनताक्लेशनाशैकदीक्षा
सीते सीदस्यहह विजले राजहंसीव हन्त ॥ २४२ ॥
यत्ते पादाम्बुरुहयुगलं स्वर्गदेव्यः स्म नित्यं
सीमन्तोद्यद्विबुधसुमनो रागतो रञ्जयन्ति ।
किं नो क्लिष्टं तदिह विपिने कत्तृणैः कण्टकैः कौ
हा हा सीते किमिह कुरुषे कारुणीं कामतन्त्राम् ॥ २४३ ॥
मा भूर्भद्रे किमपि विमना मद्विनेतुः क्षपाटान्
मा मा कार्षीः कृशमतिवपुर्विप्रलम्भे मदीये ।
शीघ्रं हत्वा दशमुखमहं तत्तनूरक्तरक्त-
पाणिभ्यां ते चिकुरनिकरं रञ्जयिष्यामि भूत्यै ॥ २४४ ॥
एवं गुह्यं कथयितुमले मन्मनो मञ्जुमूर्ते
सन्देशं मे विबुधजयिना चोरितायै प्रियायै ।
गच्छ क्षिप्रं जलधिपरिखां मित्र लङ्कामरङ्कां
सीतां कुर्याः प्रणयिवचनैः स्वस्ति पन्थाः शिवस्ते ॥ २४५ ॥
सन्देशैर्मे जनकतनयां जीवयेर्जीवितेशां
गुह्यैरेभिः प्रियनिगदितैर्जीवजीवातुभूतैः ।
श्रुत्वा तस्याः सकलकुशलं भृङ्गतो मत्प्रियाया-
स्त्वत्तः प्रीतस्तव सुवसतिं तन्मुखाब्जे करिष्ये ॥ २४६ ॥
श्रीरामोक्तं जगदघहरं गीतसीताभिरामं
सन्देशं तं मनसि कलयन्कामरूपी स भृङ्गः ।
गत्वा पारे जलधिविकलां वीक्ष्य सीतां विनीतां
वामे कर्णेऽकथयदखिलं वाचिकं राघवस्य ॥ २४७ ॥

http://www.jagadgururambhadracharya.com

श्रुत्वा भर्तुः श्रवणसुखदं वाचिकं भृङ्गगीतं
सीता प्रीता विरहजलधौ पोतमित्येव सुभ्रूः ।
सानन्दं तं नयनसलिलैश्शीतलैः स्नापयित्वा
रात्रौ चक्रे हृदयजलजे भृङ्गदूतं प्रियेष्टम् ॥ २४८ ॥
प्रत्यूषेऽलिर्भुवनजननीं तां समामन्त्र्य सीतां
चख्यौ गत्वा दिवसमणये राघवाम्भोरुहाणाम् ।
भौमीवार्तं हतदशमुखो रामचन्द्रोऽपि सीतां
लब्ध्वा रेजे रविरिव विभामाप्य राजाध्ययोध्यम् ॥ २४९ ॥
सीतारामप्रणयचरितं रामभक्त्येकसारं
मन्दाक्रान्ताविशददिविसद्भारतीभव्यगीतम् ।
सीताप्रीत्यै गिरिधरगिरा गुम्फितं रामभद्रा-
चार्यप्रोक्तं प्रभवतु सतां भूतये भृङ्गदूतम् ॥ २५० ॥

॥ श्रीराघवः शन्तनोतु ॥

॥ भृङ्गदूतम् ॥ http://www.jagadgururambhadracharya.com